No. ४३८१

Title योग वृत्ति संग्रहः

Author श्री उदयंकरः

Extent ६६ Age १८००

Subject योग शास्त्रं

योगवृत्तिसंग्रहः

४३८१

4381

F. = 66

श्रीगणेशायनमः।कुंडलीभूतसुंडान्तर्लसद्दानकुञ्जलं।।मदालसाविलसितंहेरंबंसमुपास्महे।।१।।वाग्बलस्या
लनंकृत्वावाचांवृत्त्यर्थसंग्रहम्।।चेतःसुधैर्यैपुनःकुर्वेयोगवृत्त्यर्थसंग्रहं।।२।।अथयोगानुशासनं।अथशब्दोधिकारार्थे
योगानुशासनंनामशास्त्रमधिकृतंवेदितव्यंतत्रयोगंलक्षयति।योगश्चित्तवृत्तिनिरोधः।चित्तस्यांतःकरणस्यवृत्तयोरजस्त
मःपरिणामरूपायारजस्तमःसत्त्वपरिणामरूपाणांचयावद्वृत्तीनांयोनिरोधःप्रतिलोमपरिणामेनस्वकारणेलयःसक्रमा
त्संप्रज्ञातोऽसंप्रज्ञातश्चयोगइत्यर्थः।अत्रचलयोनामनवृत्त्यभावःवक्ष्यमाणसंस्कारजनकत्वस्यास्यानुपपत्तेःनत्त्वभावः
संस्कारजनकः।किंतुजीवनयोनियत्नवदतींद्रियःप्रयत्नविशेषश्चित्तनिग्रहरूपोवृत्तिविलयहेतुर्बो[illegible]।ननुवृत्तिवि ॥१॥

2

नयबोधस्वरूपस्यपुरुषस्यवृत्तिनिरोधेकथंस्थितिरित्यतआह॥ तदाद्रष्टुःस्वरूपेऽवस्थानं॥ तदेतिवृत्त्योर्वृत्तीनांचनिरो
धकालेद्रष्टुश्चिदात्मनःस्वाभाविकेरूपेऽवस्थितिःकुसुमापायेस्फटिकस्येवेत्यर्थः॥ पुरुषस्यचैतन्यमात्रस्वभावोन
वृत्तयइतिभावः॥३॥ ननुतर्हिव्युत्थानेपुरुषस्यस्वभावात्प्रच्युतिःस्यादित्याशंक्याह॥ वृत्तिसारूप्यमितरत्र॥ इतरत्रवृत्तिनि
रोधेतोव्युत्थानेवृत्तिसादृश्यंद्रष्टुःकुसुमेलोहित्येनस्फटिकस्यकुसुमसादृश्यमिवभवतीत्यर्थः॥ अत्रसूत्राभ्यामेतत्सि
द्धंवृत्तिकालेऽप्यपुरुषस्यवृत्तिसारूप्याद्दुःखभोगरूपःसंसारोवृत्तिनिरोधेचदुःखनिवृत्तिरूपंकैवल्यमतोवृत्तयोनि
रोद्धव्याइति॥४॥ इदंचयोगस्यापातफलमुक्तं॥ मुख्यंफलंतुसंप्रज्ञातयोगस्यध्येयसाक्षात्कारोऽसंप्रज्ञातयोगस्यच

नां२

तत्वज्ञानसाध्याखिलवासनाक्षयेण प्रारब्धमप्यतिक्रम्याशु मोक्षः ॥ इति ॥ ४ ॥ निरोद्धव्यानां वृत्तीनामियत्तामाह ॥ वृत्तयः
पंचतय्यः क्लिष्टाक्लिष्टाः ॥ पंचावयवाः संख्या यासां पंचतय्यः । ताः क्लिष्टा बंधफलाः रागद्वेषादिक्लेशा हेतवः । अक्लिष्टाः
क्लेशानाश्रिन्यो मुक्तिफलाः सत्वपुरुषान्यताख्यातिगोचराः । उभयविधा अपि निरोद्धव्याः । अतः सर्वेपि जंतवः स्वमा
णानि प्रमाणादिवृत्तिभिर्ज्ञातार्थेषु रागद्वेषादिना क्रमेण सुखासुखादिना बध्यंते सत्वपुरुषान्यताख्यातिगोचरा
भिरभ्यासवैराग्याभ्यां क्लिष्टवृत्तिप्रवाहमध्ये जायमानाभिः स्वजन्याक्लिष्टसंस्काराभिर्वृद्धये पुनः पुनरभ्यस्यमा
नाभिः क्लिष्टसंस्कारनिरोधेन क्लिष्टवृत्तिप्रवाहं निरुध्य परवैराग्येण स्वयमपि निरुध्यमानाभिः संस्कारशेषस्य वि ॥५॥

तस्यप्रलयेऽशेषदुःखेभ्योविमोच्यतेः॥५॥पंचवृत्तिरुपदिशति·प्रमाणविपर्ययविकल्पनिद्रास्मृतयः॥इतोन्यावृत्तिर्नास्ती
स्पष्टत्वात्सूत्रस्यफलं·६॥तत्रप्रमाणवृत्तिंविभजते·प्रत्यक्षानुमानागमाःप्रमाणानि·अनधिगताविसंवादिवृत्तिप्रतिविं
बितोबोधःप्रमातत्करणंप्रमाणमिति·प्रमाणसामान्यलक्षणंप्रसिद्धत्वादकृत्वैवविभागःकृतः।तत्रेंद्रियद्वारासत्तोवा
मनःसन्निकर्षाज्जायतेयाऽनधिगताविसंवादिनिश्चयरूपावृत्तिःसाप्रत्यक्षंप्रमाणं·निश्चयत्वंचसंशयभिन्नत्वेसतिज्ञा
नत्वं·अतोनेच्छादावतिव्याप्तिः॥अस्यचप्रमाणस्यफलंप्रमाविदात्मस्वरूपोबोधः॥वृत्तिद्वारैवविनश्वरूपोर्थस्थिते
प्रतिविंबते·यद्यपिचिदात्मानिर्विषयःतथाप्यर्थाकारायांवृत्तौयस्मिन्सतिविंबःसोप्यर्थाकारःसन्ननिसद्भूतितस्यफलत्वं

3

चेतनपुरुषाश्रितत्वं न घटते । एवमेवानुमानाद्यखिलवृत्तीनां पौरुषेयो बोध एव फलं पुरुषार्थमेव करणव्यापारात् । वास्या
दिव्यापारवत् । व्याप्तिपरामर्शवृत्तिजन्या साध्यतावच्छेदकरूपेणार्थनिश्चयकारणवृत्तिरनुमानं योग्यशब्दजन्या वृत्तिश्चागमः ॥ एते
ष्वेव प्रमाणेषूपरोक्तानामुपमानार्थापत्त्यादीनामेवान्तर्भावः ॥ अत्र प्रमाणानां विभागवार्त्तिकं । प्रमाता चेतनः शुद्धः प्रमाणं वृत्ति
रेव च । प्रमार्थाकारवृत्तीनां विषयो मेय उच्यते । वृत्तयः साक्षिभास्याः स्युः करणस्यानपेक्षणात् । साक्षाद्दर्शनरूपं च साक्षि
त्वं सांख्यसंमतं । द्रष्टृत्वमविकारेण साक्षित्वं चापरे जगुरिति । ७ । विपर्ययं लक्षयति । विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं । वि
पर्यय इति लक्ष्यनिर्देशः । मिथ्याज्ञानमिति लक्षणं मिथ्येत्यस्य विवरणमतद्रूपप्रतिष्ठमिति । तद्रूपः स्वस्वमानाकारः न तद्रू ग॥

पोःतद्रूपोयोविषयस्तस्मिन्दृष्टत्वाद्विशेष्यरूपमित्यर्थः।अत्रमरुस्थलेचज्ञानाकारस्यैवविषयेसमारोपः।विप्रपृथ्व्यादिचित्तस्यै
नबहिष्टत्वदाञ्चनस्वप्नभ्रममदाद्येषुसर्वैरेवानुभूयतेइतिकोमेऽसम्मतेः।चित्तस्यैवमतीयतेनबहिष्ठमित्यर्थः।नचवैसौत्रान्ति
कमतप्रवेशः।तेननत्वारोपितसत्तायाअप्यन्तराकारादन्यस्मिन्नेतुबुद्धिस्थज्ञानाकाररजतस्यशुक्तावारोपेशुक्तिसत्तायास
त्वारोपेणयावद्व्यवहारंबहिःसद्भावावगमेनतत्तोविशेषात्।यदाहभगवान्पंचशिखाचार्यः।सदसत्ख्यातिर्बाधाबाधा
भ्यामिति।यावद्विशेषदर्शनमबाधात्सत्त्वंविशेषदर्शनेतुबाधात्तदभावइत्यर्थः।संशयस्यतुविपर्ययएवान्तर्भावात्तल्लक्ष
णंपृथङ्नकृतं।८।विकल्पंलक्षयति।शब्दज्ञानानुपातीवस्तुशून्योविकल्पः।श्रोत्रेन्द्रियेणग्राह्यस्ययश्शब्दस्यज्ञानंतदनुतरन्तत्तरं

4

१ततितयादृश्यार्थाकारवृत्तिरस्तेतिगच्छति·तस्तवृत्तिस्वरूपोविकल्पइत्यर्थः।अयंचवस्तुशून्यत्वान्नप्रमाणं।वाधेप्यवस्तुय
भावित्वाच्चनविपर्ययः।अस्योदाहरणानि·पुरुषस्यचैतन्यंराहोःशिरःवंध्यापुत्रइत्यादीनि·९।निद्रांलक्षयति·अभा
वप्रत्ययालंवनावृत्तिर्निद्रा·कार्यंप्रत्येतिगच्छतीतिप्रत्ययोहेतुरुच्यते·प्रकरणादुक्तवृत्तीनामभावस्यानुसादस्ययःप्रत्य
यःहेतुभूतंतमस्तदालंवनातद्विषयिणीतमःप्रचुरचित्तविषयिणीवृत्तिर्निद्रेत्यर्थः।वृत्तिग्रहणेनुवर्तमानेपुनर्वृत्तिग्रहणं
ज्ञानाभावोनिद्रेतिमतनिरासार्थं· तथाहि·जाग्रत्स्वप्नास्यवृत्त्युपरमेचित्तस्यस्वगतसुखादिविषयिणीनिद्राख्यावृ
त्तिरनुमीयतेसुखमस्वाप्संदुःखमस्वाप्संगाढमूढोस्वाप्समित्ये — वंत्रिविधनिद्रोत्थितानांत्रिविधस्मरणादेतानिद्रापि ॥१०॥

वृत्तिरिति · न च गर्भे चैतन्यं प्रति विवंते · गाढतमसो दोषस्य प्रतिबंधकत्वात् · न च निद्रायां पुरीतति मनःप्रवेशात् स्वप्नो योगा
देर्व्येति कारणस्याभावः । इंद्रियाणुसंततेः प्रागेव हिरण्यगर्भस्य वृत्त्युत्पत्तेरंगीकारेण त्वङ्मनःसंयोगादीनां तत्र कारणत्वस्या
कल्पनात् ॥ ७ ॥ स्मृतिं लक्षयति · अनुभूतविषयासंप्रमोषः स्मृतिः । अनुभूतो यो विषयो वृत्तितदारूढस्तथौ तयानोस्ति सं
प्रमोषः स्तेयमपहारो यस्मात् स वृत्तिविशेषः स्मृतिरित्युच्यते · न च प्रमुष्टतत्ताकपदजन्यपदार्थोपस्थित्यादावव्याप्तिः ।
तस्य शाब्दबोधादिस्वरूपाभ्युपगमादिष्टापत्तेः । एवं च स घट इत्यादितत्तोल्लेखिन्येव वृत्तिः स्मृतिर्यत्र स इति पूर्वोपस्थितिर
पि मा सत्त्विति सिद्धांतः ॥ प्रत्यभिज्ञाव्यावृत्तये संस्कारमात्रजन्यत्वं विशेषणीयं · सोयमित्येवमात्मिकायास्तस्या इंद्रमंजोडद्रि

5

यसन्निकर्षजत्वात् ११ उक्तानां वृत्तीनां निरोधोपायमाह अभ्यासवैराग्याभ्यां तन्निरोधः । चित्तवृत्तीनां विषयाभिमुखता
स्वभावभंगो वैराग्यसाध्यः । अनभ्यासे तुलयविक्षेपस्वभावस्य चित्तस्य वैराग्याद्विक्षेपभंगे निद्रास्यादतउभयोपादानं·
१२ अभ्यासं व्याचष्टे तत्र स्थितौ यत्नोऽभ्यासः तत्र वृत्तिनिरोधेउपकारकत्वेन वर्तमानायाः स्थितिः रजस्तमोवृत्तिशून्यचि
त्तैकाग्र्यं तत्र यः प्रयत्नो यमनियमादिसाधनानां पुनः पुनरनुष्ठानं सोऽभ्यास इत्यर्थः १३ तस्यैव विशेषमाह स तु दीर्घका
लनैरंतर्यसत्कारासेवितो दृढभूमिः । बहुकालं नैरंतर्येण ब्रह्मचर्यादि संस्कारैश्चासेवितो दृढभूमिर्भवति सुत्थानसं
स्कारेणानभिभूतां स्थितिं जनयतीत्यर्थः १४ वैराग्यमाह दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं·१५ ॥५॥

विधो विषयः द्दष्ट आनुश्रविकश्च· द्दष्ट इहैवोपलभ्यमानः शब्दादिः। अनुश्रूयते गुरुमुखादित्यनुश्रवो वेदः। तत आग
तो ज्ञान आनुश्रविकः पारलौकिकः। तयोर्द्वयोरपि विषययोः परिणामविरसत्वदर्शनाद्विगततृष्णस्य उपभोगपर्यन्तोग
द्धीयस्य तस्य वशीकार संज्ञा ममैते वश्या नाहमेतेषां वश्यः सत्यप्युपभोग इत्येवं यो विमर्षस्तद्वैराग्यमित्युच्यते·१५ तस्ये
वविशेषमाह· तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं· तद्वैराग्यं परं उत्कृष्टं· प्रथमं वैराग्यं विषयविषयं· द्वितीयं गुणविषयमु
त्पन्नपुरुषविवेकख्यातेरेव भवति गुणत्रयेनेह विषयसौक्ष्म्यं तत्संस्काराख्यमुच्यते अपर आहुः उत्पन्नपुरुषविवेक
ख्यातेर्गुणः पुरुषविवेकख्यातिमांस्तत्रैवैतृष्ण्यमित्यनेन प्रथमं वैराग्य वर्तमानस्य विनाशित्वादि दोषदर्शन साम्येपि

6

न पुरुषविवेकख्यातावलंबुद्धिरविधानिवृत्याख्यप्रयोजनवत्वात् अनेनैं प्रथममैवैराग्येनैः तु वैराग्येणाविधायिनि वृत्तो

प्रागुक्तदोषदर्शनेनात्मदृष्याच्च पुरुषविवेकख्यातावप्यलंबुद्धिरिहोच्यत इति ॥ १६ ॥ योगस्य ससाधनं स्वरूपं निरू

प प्यतस्य संज्ञातासंप्रज्ञातस्वरूपमवांतरभेदमाह: वितर्कविचारानंदास्मितानुगमात्संप्रज्ञातः ॥ साक्षात्कारविशेषरू

पो वितर्कादिभिरनुगमाद्धेतोः सम्यक् प्रज्ञातत्वेन संप्रज्ञातनामा योगो भवति यथा लोके प्राथमिको धानुष्कः स्थूलमे

वलक्ष्यं विध्यति पश्चात्सूक्ष्मं तथा प्राथमिको योगी स्थूलमेव महाभूतेंद्रियालंबनेन साक्षात्करोति स साक्षात्का

रो वितर्क इत्युच्यते तदनुगतो योगः सवितर्कः ॥ तस्य स्थूलस्य कारणं सूक्ष्मं पंचतन्मात्राणि तदालंबनेन साक्षात्का ॥ ६ ॥

रोविचारस्वध्यानेनतदनुगतोयोगःसविचारः।उभयविधोप्ययंग्राह्यसमापत्तिरितिव्यपदिश्यतेतेषांतन्मात्राणांकारण
महंकारस्तस्यचरजस्तमोलेशानुविद्धांतःकरणसत्वरूपेणालंबनेनसाक्षात्कारआनंदःउध्यानेनतदनुगतोयोगःसानंदः।
सोयंग्रहणसमापत्तिः।तस्याहंकारस्यकारणंमहात्त्वरजस्तमोनभिभूतंशुद्धंसत्वंतदालंबनेनसाक्षात्कारोऽस्मितात
दनुगतोयोगःसास्मितः।अयंग्रहीतृसमापत्तिः।अत्रयथाघटज्ञानंमृद्विषयंतारात्स्यात्तथास्थूलयोगःस्थूलसूक्ष्म
नंदास्मिताविषयःसूक्ष्मयोगस्त्वयविषयोःन्योपेक्षविषयोऽसुचसंप्रज्ञातभूमिषोत्सर्गिकःक्रमोस्तियथैतस्थूलादि
क्रमेणैवपरमसूक्ष्मपर्यंतेचित्तसमाधानमितिन्यस्यत्वीश्वरानुग्रहवशात्ततोवोत्तरभूमिलाभोनतस्यापूर्वभूमिषु

साक्षात्कारोपेक्षितः। मत्साक्षात्कारस्य घटाद्यविषयत्ववत्तत्स्मादिसाक्षात्काराणांस्थूलबाधविषयकत्वावत्‌ ३७। सोपायम

7 संप्रज्ञातमाह-विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोन्यः। विरम्यतामित्येवंयः प्रत्ययः प्रागुक्तवितर्कादिवृत्तिष्वलंबुद्धिः प

रंवैराग्यंतदभ्यासात्सोन्यः पुन्याज्जायते यः संस्कारमात्रावशेषोवृत्तिनिरोधः स संप्रज्ञातादन्योऽसंप्रज्ञातइत्यर्थः। संस्कार

मात्रशेषइत्यनेन मोक्षकालिकनिरोधव्यावृत्तिः। असंप्रज्ञाते हि व्युत्थानार्थं वृत्तिसंस्कारमात्रं तिष्ठति निवृत्तिर्मोक्षे तु चि

त्तस्यात्यंतलयात्संस्कारोपि न तिष्ठतीति विशेषः। ३८। असंप्रज्ञातं द्विधा विभजते सूत्राभ्यां-भवप्रत्ययो विदेहप्रकृति

लयानांविदेहानांप्रकृतिलयानां चासंप्रज्ञातो भवप्रत्ययसंज्ञको भवति-भवो जन्मैव प्रत्ययः कारणं यस्येति युस्तेस्सि ॥७॥

थेः। देहनैरपेक्ष्येणैव बुद्धिवृत्तिमंतः। सिद्धा विदेहा इति विभूतिपादे भाष्यकाराः। ते च महदाद्येषां देवास्तेषां च साध
नानुष्ठानं विनैवासंप्रज्ञातयोगो भवति स्वाभाविकात्मसाक्षात्कारतः परवैराग्यात्। तथेश्वरोपासनया प्रकृत्युपास
नया वा ये ब्रह्मांडं भित्वा लिंगशरीरेण सह प्रकृत्यावरणं गतास्तेत्र प्रकृतिलीनास्तेषामपि साधनानुष्ठानं विनैव बहि
राविर्भावरूपाज्जन्मन एवासंप्रज्ञातो भवत्युक्तहेतोः ॥१९॥ द्वितीयमाह। श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां।
इतरेषां विदेहप्रकृतिलयातिरिक्तानां श्रद्धाद्युपायजन्य एवासंप्रज्ञातो भवति न तु स्वाभाविक इत्यर्थः। श्रद्धा आस्तिक्य
बुद्ध्या योगात्तं कृटां श्रद्दधानस्य वीर्यं धारणारूपः प्रयत्नो भवति। वीर्याच्च स्मृतिर्ध्यानं। स्मृतेश्च योगं चरमांगं समाधिः। त

8

देवं श्रद्धामूलकाद्धारणाक्रमात्रयात्संप्रज्ञातयोगजायमाने जीवब्रह्मान्यतरविशेषसाक्षात्काररूपा प्रज्ञा जायते· प्र
ज्ञातस्य परवैराग्यद्वारेणासंप्रज्ञातो भवति·२०·योगमुक्त्वा तस्यासन्नत्वहेतुमाह·तीव्रसंवेगानामासन्नः।तीव्रोतिश
यितः संवेगो वुष्ठानाविच्छेदो येषां तेषां सासन्नो योग इत्यर्थः।२१।आसन्नतायास्तरतमभावमाह·मृदुमध्याधिमात्र
त्वात्ततोपि विशेषः।मृदुत्वं शैथिल्यं मध्यत्वं प्रसिद्धमधिमात्रत्वमधिकप्रमाणत्वमेतैस्तीव्रसंवेगगंततीव्रताविशे
षेणैरनुष्ठानैस्त्रैविध्यात्ततोप्यासन्नापेक्षयापि विशेष आसन्नतरासन्नतमरूपो भवतीत्यर्थः।२२।तरतमभावे सा
धनांतरमाह·ईश्वरप्रणिधानाद्वा·२३·ईश्वरप्रणिधानं निरूपयितुं प्रथममीश्वरलक्षणमाह·क्लेशकर्मविपाकाशयैर ॥८॥

परामृष्टः पुरुषविशेष ईश्वरः। क्लेशा अविद्यास्मितारागद्वेषाभिनिवेशा द्वितीयापादे व्याख्यास्याः। कर्म धर्माधर्मौ। वि

पाकाः कर्मफलानि जन्मायुर्भोगाः। आशेरते चित्तभूमावित्याशया ज्ञानादिवासनाः। एतैरपरामृष्टः कालत्रयेप्यसा

वन्येभ्यः पुरुषेभ्यो विशिष्यते यः स ईश्वरः। क्लेशादेरंतःकरणधर्मत्वाज्जीवानां तैरपरामृष्टत्वेपि स्वामित्वसंबंधेन परा

मर्शोऽत्र विवक्षित इति तत्त्वावृत्तिः। न हि क्लेशादिफलानां सुखदुःखानां भोक्तृत्वात् क्लेशादिस्वामिनः।२४। ईश्वरे प्रमा

णमाह। तत्र निरतिशयं सर्वज्ञबीजं सर्वज्ञस्य बीजमनुयापकं यज्ज्ञानस्य सातिशयत्वं तत्तत्रेश्वरे निरतिशयं विश्रांत

मित्यर्थः। अनुमानं चैवं ज्ञानं क्वचित्प्राप्तकाष्ठं सातिशयत्वात्परिमाणवदिति।२५। ईश्वर इत्यनेनोक्तमैश्वर्यं तस्यानिस

मित्याह॥ सपूर्वेषामपिगुरुः कालेनानवच्छेदात्॥ पूर्वेषांहिरण्यगर्भादीनांगुरुर्जन्मदःपिताउपदेष्टाच॥ योब्रह्माणंविदधा
णोति ति पूर्वंयोवैवेदांश्चप्रहिंतस्माइतिश्रुतेः। कालेनानवच्छेदादिति॥ परस्त्रिकालाद्यितिश्रुतेः। नयत्रकालेनिमिषांपरःप्र
भुरितिस्मृतेश्च॥ ननुज्ञानक्रियाशक्तिमत्परमैश्वर्यंपुरुषस्यापरिणामिनःकथंउच्यते अस्तीश्वरस्यानादिसिद्धंशुद्ध
सत्वात्मकंचित्तंप्रधानजंनिरतिशयज्ञानक्रियाशक्तिमत्॥ सहिभगवान्संसाराब्धौनृणामुद्धरणेच्छयातच्चित्तमुपादत्ते॥ न
च्छिनाज्ञानधर्मोपदेशाभक्तानुग्रहायोगात्॥ नचेच्छांविनाचित्तोपादानंसंभवति चित्तोपादानमंतरेणचेच्छस्यान्यो
न्याश्रयइतिवाच्यं॥ बीजांकुरवदनादित्वात्सर्गप्रवाहस्येष्टत्वात्॥ नचतादृशचित्तसत्त्वेप्रमाणाभावः। स्वाभाविकीज्ञान॥१॥

बलक्रियाश्चेत्यादिभिः तैरेव प्रमाणत्वादिति संक्षेपः ॥२६॥ ईश्वरं लक्षयित्वा तत्प्रणिधानं लक्षयितुं तस्य रहस्यं संज्ञा

माह॥ तस्य वाचकः प्रणवः स्पष्टं ॥२७॥ प्रणिधानं लक्षयति॥ तज्जपस्तदर्थभावनं॥ प्रणिधानमिति शेषः। जपः पुनः पुनरुच्चारणं॥

भावनं चेतसि निवेशनं तथा चोक्तं॥ ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यापितव्यमित्येतदक्षरं परं ब्रह्मेति स्मृतिश्च

ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्निति ॥२८॥ ईश्वरयोगस्य संख्ययोगापेक्षयातिशैर्यं वक्तुं फलान्तरमप्याह॥ ततः

प्रत्यक्चेतनाधिगमोऽन्तरायाभावश्च॥ प्रतिपं विपरीतमञ्चति ज्ञायरहितं जानातीति प्रत्यक् स चासौ चेतनश्च जीवस्तस्याधि

गमः साक्षात्कारो भवत्यपि द्रष्टादासन्नतमयोगसमुच्चयः। अन्तरायान्तरायायोगविघ्नास्तेषामभावश्च भवतीत्यर्थः ॥२९॥

10 अंतरायानाह॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्ते
ऽन्तरायाः॥ यत्नो व्याध्यादयश्चित्तविक्षेपकास्ते प्रसिद्धा अंतरायाः योगविघ्ना इत्यर्थः॥ तत्र व्याधिर्धातूनां वातपित्तकफानां
वैषम्यकृतो ज्वरादिः॥ स्त्यानं चित्तस्य लघुत्वेऽप्यकर्मण्यता॥ संशयो गुरुशास्त्रयोस्तत्साधने पूर्वकोटिस्पृग्ज्ञानं॥ प्रमादोऽन
वधानं आलस्यं कायचित्तयोर्गुरुत्वादप्रवृत्तिः॥ अविरतिर्विषयाभिलाषः॥ भ्रांतिदर्शनं गुर्वादिप्रमितार्थविपरीतनि
श्चयः॥ अलब्धभूमिकत्वं वक्ष्यमाणानां योगभूमीनां साधनानुष्ठानेऽप्यलाभः॥ अनवस्थितत्वं योगभूमिलाभेऽपि तत्र
ग्रः॥ ३०॥ न केवलमेते चित्तस्य विक्षेपकाः एवापि तु दुःखादीनपि कुर्वंतीत्याह॥ दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा वि ॥१०॥

क्षेपसहभुवः। दुःखं स्वतो द्वेष्यं दौर्मनस्यं चित्तचांचल्यं· अंगमेजयत्वं अंगकंपः। श्वासो देहांतर्वाह्यवायोरधिकप्रवेशः स
त्यामनिच्छायां· प्रश्वासो देहादधिकवायोर्बहिर्निर्गमः। एते विक्षेपसहभुवो व्याध्याद्यव्यवधाने नैवे जायंत इत्यर्थः।३१।
सूत्रद्वयोक्ता अंतराया ईश्वरप्रणिधाननिरस्या इत्युक्तं· तदसंभवेनुयत्नकृत्वचित्तैकाग्र्येणाप्येते बलवदभ्यासेनोनि
रसनीया भवंतीत्याह· तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः स्पष्टं।३२। चित्तस्यास्य यादिमलवृत्तौ योगानुष्ठानायोगात्तन्मल
निरासायपरिकर्माह· मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं· मैत्री
सौहार्दं· करुणा निरुपधिपरदुःखप्रहाणेच्छा मुदिता हर्षः। उपेक्षौदासीन्यं सुखादिप्राप्ताश्च धर्मिवचनाः। तत्र सु

रिवविषयापामैत्र्याभावनाच्चित्तप्रसादनमित्यादियथासंख्येनान्वयः। अस्य च प्रसादस्य वक्ष्यमाणसूत्रद्वयोक्तस्थै
तास्थित्युपायसहकारित्वेन परिकर्मसंज्ञा उत्तरसूत्रे वाशब्दस्तूत्तरसूत्रोक्तचित्तस्थित्युपायान्तरापेक्षया विकल्पा
र्थो न त्वेतत्सूत्रोक्तप्रसादोपायमैत्र्याद्यपेक्षयेति मिश्राः। राजपक्षपातोऽप्यत्र वार्तिकानुसारिणैवं सति तृतीय
सूत्रस्थवाशब्दस्यैवं यथार्थं स्यात् अनन्तरसूत्रस्थवाशब्दैश्चैतत्सूत्रोक्तमैत्र्याद्यपेक्षया प्रसादोपायान्तरविकल्पार्थकत्वं
तृतीयसूत्रस्थवाशब्दस्य त्वेतत्सूत्रोक्तप्रसादे चित्तस्थित्युपायताबोधनद्वारा तदपेक्षया चित्तस्थित्युपायान्तरबोधक
त्वमित्याहुः॥३३॥ प्रच्छर्दनविधारणाभ्यां वा प्राणस्य। प्रच्छर्दनं वमनं रेचनमिति यावत्। विधारणं कुम्भकः। तत्त्वार्थास्तु ॥३४॥

रकानंतरं रेचकोत्तरपूरकं विना विधारणासंभवात्प्राणायामतयास्य भाष्ये उक्तत्वात् तया चैतद्ध्यास्तरणगर्भोच्चित्तस्य
स्थितिर्भवतीत्यर्थः मतांतरे चित्तप्रसादो भवतीत्यर्थः। अपर आह विधारणमिह पूरक उच्यते वसिष्ठसंहितायां नाडीषु
ध्यर्थैस्चकपूरकमात्रस्यापि प्राणायामस्योक्तत्वादिति ३४ विषयवती वा प्रवृत्तिरुत्पन्ना स्थितिनिबंधनी ३५ मनस इति
वाक्यशेष इति राजवृत्तौ। इदानीं तु भाष्ये पुस्तके सूत्र एव तथा पठ्यते। विषयाणां गंधादयः पंच विषयास्तेन संस्पर्शाः सा
विषयवती प्रवृत्तिः साक्षात्काररूपा वृत्तिः प्रवृत्तिरुत्पन्ना मनसः स्थितिर्निबध्यते ऽनया तथा भवति मनः स्थैर्यं करोती
त्यर्थः। तथा हि नासाग्रे चित्तं धारयतो दिव्यगंधस्य साक्षात्कारो भवति जिह्वाग्रे दिव्यरसस्य तालुनि दिव्यरूपस्य

जिह्वामध्ये रिंद्रियस्पर्शस्य जिह्वामूले नादस्याग्रास्य स्येति भाष्यप्रदर्शितरीत्यानंतरींद्रियद्वारेण तस्मिंस्तस्मिन्दिव्ये विषये ज्ञा
12 यमानः साक्षात्कारः स्थालीपुलाकन्यायेन शास्त्रोक्तार्थांतरेष्वपि विश्वासमुत्पादयन्नापवर्गादेः सूक्ष्मतमेऽलक्ष्ये चित्तस्थै
र्यायभवति ३५ विशोकावाज्योतिष्मती ३६ तः सूत्रचतुष्टयपर्यंतं मनसः स्थितिनिबंधनीतियथायथं लिंगव्यत्ययेनानु
वृत्यासंबध्यते अंतःकरणस्य पुरुषस्य वा योगजसाक्षात्काररूपा वृत्तिर्ज्योतिष्मत्युच्यते सत्त्वयतः शोकनाशकत्वाद्विशो
कातश्चासौ चस्मेहेतुः शोकनिवृत्त्या सा वा मनसः स्थितिनिबंधनीत्यर्थः। आत्मसाक्षात्कारे पुनश्चित्तस्थितिः किमर्थमपेक्षि
तेति चेद्संप्रज्ञातहेतुपरवैराग्योत्पादनाय परमात्मनि चित्तस्थैर्योपयोगि ३६ वीतरागविषयं वा चित्तं वीतरागो यस्मा ग७२।

नघत्सनकादीनांचित्तंतद्विषयंवायोगिनश्चित्तंस्थितिनिबधनंभवतिविरक्तचित्तस्यभावनयाविरक्तंचित्तंदृढस्थित
येभवतीत्यर्थः॥३७॥स्वप्ननिद्राज्ञानालंबनंवा॥प्रत्यस्तमितबाह्यवृत्तेर्मनोमात्रेणैवयत्रात्मनोभोक्तृत्वंसस्वप्नः॥निद्रापू
र्वोक्तास्वप्नश्चनिद्राचस्वप्ननिद्रेतेचतज्ज्ञानेवृत्तीतयोरन्यतरालंबनंवाचित्तंस्थितिनिबंधनंभवति॥प्रपंचज्ञानेस्वप्न
दृष्ट्यासंसारिषुसुषुप्त्यादृष्ट्याचचित्तस्यस्थितिर्भवतीत्यर्थः॥ननु॥दीर्घस्वप्नमिमंविद्धिदीर्घंवाचित्तविभ्रमं॥दीर्घंवापि
मनोराज्यंसंसारंरघुनंदनेत्यादि॥चराचरंलयइवप्रसुप्तमिहपश्यता॥किंमृषाव्यवहारेषुनविरक्तोभवेन्मनइत्यादि॥
३८॥यथाभिमतध्यानाद्वा॥किंबहुनायदेवाभिमतंहरिहरहिरण्यगर्भमूर्त्यादिकंतदेवासौध्यायेत्ततोपिध्यानाच्चित्तंस

वैत्रवद्धस्यन्तिवं भवतीत्यर्थः ।३९। ननुजायमानाया श्चित्तस्थितेः किंज्ञापकमत आह॰ परमाणुपरममहत्त्वांतोस्य
वशीकारः ।अस्यचित्तस्यसूक्ष्मेनिविशमानस्यपरमा एवंतोवशीकारोः प्रतिघातोभवति॰ नक्वचित्परमाणुपर्यंते
सूक्ष्मविषयेस्यमनः प्रतिहन्यते। तथा स्थूलेनिविशमानस्यपरमंमहत्त्वं येषांतेपरममहत्त्वाआकाशाद्यास्तदंतोवशी
कारोभवति तत्रापिनास्यमनःप्रतिहन्यते सर्वत्रैवास्यस्वातंत्र्यं भवतीत्यर्थः ।४०। एवंचित्तस्थितेरुपायाउक्ताः तज्ज्ञा
पकस्यवशीकारउक्तः। संप्रतिलब्धस्थितिकस्यचित्तस्यकिं विषयः किंरूपश्च संप्रज्ञातोयोगोभवतीत्यतउत्तरं पठति॰
क्षीणवृत्तेरभिजातस्येवमणेर्ग्रहीतृग्रहणग्राह्येषुतत्स्थतदंजनतासमापत्तिः । क्षीणवृत्तेर्निरुद्धध्येयातिरिक्तव ।४१।

ऐतेनिष्पन्नसंगृहीतयोगस्यहेतुगर्भंचैतद्विशेषणं·समापत्तिःसासाक्षात्कारऽरूपनयत्तिरि·तथाचयतश्चित्तस्यस्वत
एवसर्वार्थग्रहणसमर्थस्यविषयांतरव्यासंगदोषादेवप्रतिबंधोवृत्त्यंतरनिरोधेनप्रतिबंधापगमेसतिग्रहीत्रा
दिषुध्येयेषुसमापत्तिःसाक्षात्काररूपावृत्तिश्चित्तस्यस्वतएवभवतिसाचतत्स्थातदंजनतारूपातेषुग्रहीत्रादिषुस्थि
तस्यचित्तस्यसम्यग्ग्रहीत्राद्याकारतान्यभूतंचित्तविषयस्यभाव्यमानस्यैवोत्कर्षोयथाभवतितथेत्यर्थः।अत्रदृ
ष्टांतः।अभिजातस्येवमणेरिति·यथाभिजातस्यस्वभावतोनिर्मलस्यमणेःस्फटिकादेर्बाह्यमलापगमेसन्निकृष्ट
वस्त्वाकारतातद्वदित्यर्थः।पधपिग्रहीतृग्रहणग्राह्येष्वित्युक्तंतथापिभूमिकाक्रमवशाद्ग्राह्यग्रहणग्रहीतृष्विति

बोद्धव्य· यथा प्रथम पंचभूतात्मके स्थूले ग्राह्ये समापत्तिस्तदनु तस्मिन्नेवैस्मिन्न ततो ग्रहणे सात्विकाहंकाराख्ये ततश्चकर
14 णे ततो ग्रहीतर्यस्मितारूपे केवलस्य पुरुषस्य ग्रहीतुर्भोग्यत्वासंभवात्· सचायं वितर्कविचारानंदास्मितानुगमात्सं
प्रज्ञात इति सूत्रे व्याख्यातश्चतुर्विषयः संप्रज्ञात एवं त्रिषु केवल विषयेष्वपि समापत्तिर्बोद्धव्या· न हि ग्रहीतृग्रहणमात्रेषि
न्निविपर्यासात्· सोपाधिकेनेन भगवान्सूत्रकारः सूचितवान्· ४१· ग्राह्य समापत्तिर्द्विविधा स्थूलविषया सूक्ष्मविषया
च द्विविधापि प्रत्येकं द्विविधा तत्र स्थूलविषयायाः भेदमाह· शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का· सूक्ष्मविषयायाः
समापत्तेर्वक्ष्यमाणत्वादियं स्थूलसमापत्तिरिति परिशेषलब्धं· तत्र शब्दः श्रोत्रेंद्रियग्राह्यो वर्णात्मकः स्फोटो वा· अर्थो ॥४२॥

जात्यादिलक्षणःज्ञानंसत्वप्रधानाबुद्धिवृत्तिःविकल्पउक्तलक्षणःतैःसंकीर्णायस्यांभेदाग्रहाद्शब्दादयःपरस्परमभेद
भ्रमेणभासंतेगौरितिशब्दःगौरित्यर्थःगौरितिज्ञानमित्यनेनाकारेणसागवादिस्थूलसमापत्तिर्विपरीततर्केणयो
गात्सवितर्केणयोगात्सुच्यते अतएवतत्कालिकयोगःसविकल्पइत्युच्यते विकल्पसंकीर्णत्वात् एतद्विकल्पशून्य
एवचनिर्विकल्पकयोगइत्युच्यते अत्रचशब्दार्थभेदविकल्पआरोपसामान्योपलक्षकः एवमुत्तरसूत्रेपि ४२॥ द्विती। तस्याएव
यंभेदमाह स्मृतिपरिशुद्धौस्वरूपशून्येवार्थमात्रनिर्भासानिर्वितर्का येयंपूर्वसूत्रेसमापत्तिरुक्ताश्रवणमननानि
दिध्यासैतैःसाजायते तत्रश्रवणंनामशब्दजबोधस्तत्रयोयंशब्दःसोर्थइत्यभेदस्वरूपसंकेतेनस्मरणकार्यमतःसं

वैतेस्मृतिजन्येनागमात्बोधोपनतयोरभेदरूपनयुभयोरध्यासेन· ततश्च श्रवणकार्येमननेनेतिद्विध्यासेन प्राथमिक साक्षा
15 त्कारस्वभासतेउपनयेनोत्थ्यात्· यदानुध्येयावेशावशात्तस्यात्विकल्परूपायाः संकेतस्मृतेः परिशुद्धिरपगमो भवति स
मापत्तिश्च स्वरूपशून्येवाज्ञायमाना भवति तदा शास्त्रज्ञानयोरस्फुरणेनाभेदाध्यासेपासंभवादर्थनिर्भासमात्रगोचराध्ये
यमात्रावगाहिनी निर्विकल्पशून्या स्थूलसमापत्तिर्निर्वितर्कसंज्ञेत्यर्थः इयं च द्विविधालिङ्गेना संपर्कात्सरंभस्य समित्युच्यते
पूर्वस्मृत्रोक्तात्परं प्रत्यक्षमविधालिङ्गासत्वात्· ४३। स्थूलविषये समापत्ति द्वैविध्यं प्रदर्श्य सूक्ष्मविषयेऽपि तस्या द्वैविध्य
मतिदिशति· एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता· एतयैव सवितर्कनिर्वितर्करूपया स्थूलविषयक·३५।

सामापत्त्यास्सूक्ष्मविषया सविचारनिर्विचाररूपा समापत्तिर्द्व्याख्याता ॥ अन्योपरागानुपरागसामान्यादित्यर्थः ॥ अत्र
हि विकल्पतत्त्वशून्यत्वयोर्नातिदेशः ॥ स्थूलविषयिण्यां निर्वितर्काख्यपूर्वभूमिकायां त्यक्तस्य यथोक्तविकल्पस्य सूक्ष्म
विषयिण्यामुत्तरभूमिकायामसंभवादिति ॥ तत्र स्थूलरूपं यत्कार्यं तदुपरागेण सूक्ष्मे समापत्तिः ॥ सविचारा कार्यकारण
विचारघटितत्वात् तदुत्तरोत्थमानाच्च केवलसूक्ष्मविषयिणी निर्विचारेति विभागः ॥ ४४ ॥ सूक्ष्मविषयस्यावधिमाह ॥
सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ॥ आलिङ्गा प्रकृतिः तत्र पर्यवसानं समाप्तिर्यस्य तत् ॥ ननु पुरुषः सूक्ष्मो नापि परमाणा
व एवेत्यर्थः ॥ तन्नात्र तत्त्वान्तरप्रकृतित्वं सूक्ष्मत्वमिति पर्यवसितार्थः ॥ न च जलादिभूतचतुष्टये गतिव्याप्तिः ॥ स्वोत्तरभूतेषु गु

16

तानामाधारकारणमात्रतातन्मात्राणामेवभूतोपादानत्वात् अष्टप्रकृतिसिद्धान्तविरोधस्यान्यथाप्रसक्तेश्चैवं पूर्वपूर्व
भूतगुणस्योत्तरोत्तरभूते संक्रमात्तस्यात् पूर्वपूर्वतन्मात्रविशिष्टोत्तरोत्तरतन्मात्राणामेवतथात्वादित्यलंकौमुद्यांमि
श्राः॥४५॥ वितर्कविचारेत्यादिसूत्रेण पूर्वं संप्रज्ञातस्यावान्तरभेद एवोक्तो न संप्रज्ञातसामान्यं लक्षितम् अतो यथोक्तसमाप
त्याख्यकार्यमुखेन सबीजसंज्ञापूर्वकं संप्रज्ञातसामान्यलक्षणमाह ता एव सबीजः समाधिः ॥ ता इत्युक्ताः समापत्तयः स
बीजः समाधिः संप्रज्ञातयोग इत्यर्थः ॥ समापत्तिहेतुत्वाद्योगस्य समापत्तित्वं कार्याभेदेनोक्तं समाधाविष्टाङ्गाङ्गिनोरभेद
विवक्षया योगे प्रयुक्तः ॥४६॥ ग्राह्यसमापत्तीनां मध्ये निर्विचारकाष्ठायाः फलतोऽतिशयमाह निर्विचारवैशारद्येऽध्या ॥१७॥

तमप्रसारः॥ ध्येयगताशेषविशेषप्रतिबिंबग्राहिणा निश्चलैकाग्रता चित्तस्यैव वैशारद्यं· निर्विचारसमापत्तेरेवं वैशारद्ये सत्य
ध्यात्ममुक्तिमालंबनेनो प्रसादो भवति· सम्मस्यैवव्ययीभावः॥ ग्रहणसमापत्तिः सानंदाख्येयं· सापि ध्येयांशोत्कर्षपूर्वकं वृ
त्तिन्यग्भावे आनंदमात्रस्वरूपावस्थ्यनेनास्थितरं जनना समापत्तिरिति· यस्यानंदालंबनवृत्तितदभावाभ्यां सविचारनिर्वि
चारद्वयोरेवानयोरंतर्भाव इति नद्युक्तं· आनंदालंबनवृत्तेर्न्यग्भावे विश्लिष्टस्यानंदमात्रस्यापि वृत्तिरूपत्वेन वृत्त्यभावरूप
निर्विचारत्वस्य तत्रासंभवात्॥ ४७॥ ग्रहणसमापत्त्यनंतरं तत्कारणालंबनाया ग्रहीतृसमापत्तेस्तांत्रिकां संज्ञामाह ऋतंभ
रा तत्र प्रज्ञा· तत्र चित्तप्रसादे सत्यनंतरं या वृत्तिः सा ऋतं महदाख्यमालाबनं बिभर्तीत्यृतंभरा साम्मितारव्या· प्रज्ञेत्यस्येनै

17

तस्याह·वृत्तेरन्यभावादस्मितामात्रशेषासौ प्रकृष्टसाक्षात्काररूपत्वात्प्रज्ञेत्ययमुच्यते·सविचारनिर्विचाररूपत्वमत्र पूर्वे
वलिरसनीयं·४८॥नन्वागमानुमानाभ्यामेव प्रमाणाभ्यामर्थतत्त्वं गृह्यतामलं तदुत्तरं योगेनेत्यात आह·श्रुतानुमानाभ्या
मन्यविषया विशेषार्थत्वात्·सा तु योगजा प्रज्ञा श्रवणमननाभ्यां सातिरिक्त विषया विशेषार्थत्वाद्विशेषविषयत्वादित्यर्थः
शब्दानुमानेन हि सामान्यमात्रविषयकं भवतः सामान्यपुरस्कारेणैव संकेतग्रहाद्व्याप्तिग्रहाच्च न तु संकेतव्याप्त्यनवच्छेद
प्र कविशेषग्राहकं योगजं ज्ञानं तु तद्ग्राहि कं सतोऽनधिगताधिगंतृत्वाद्योगजप्रज्ञायाः प्रमाणान्तरत्वं·ननु पुरुषेषु विशेषा
भावात्तत्सज्ञा किं विशेषग्रहणे सफला स्यात् उच्यते आतः स्वस्वोपाधि प्रति बिंबता नामेवातीतानागतवर्तमानानां भो ॥४९॥

गरूपाणां मुक्तामुक्तसकलपुरुषेष्वन्योन्यविशेषत्वादिति ॥४९॥ ननु तथापि प्रज्ञोत्पत्तिपर्यंतं संप्रज्ञातयोगापेक्षास्तु प्रज्ञो
त्पत्त्यनंतरं संप्रज्ञातपरंपरायां किं फलमित्याकांक्षायामाह ॥ तज्जः संस्कारोऽन्यसंस्कारप्रतिबंधी ॥ तयास्मिन्मतसमाधिप्रज्ञारो
याजनितः संप्रज्ञातोऽन्येषां व्युत्थानसंस्काराणां प्रतिबंधी स्मृत्याख्यकार्यविरोधीत्यर्थः ॥ तथा चोक्तविधप्रज्ञासंस्कारदा
र्ढ्येन व्युत्थानसंस्काराणामभिभवात् निरोधायः क्रमेण प्रभवतीति तस्य स्वदुःखहेतु व्युत्थानसंस्काररूपेऽपि प्रज्ञाकृत्ये समाप्ते प्रज्ञा
यामप्युत्सं बुध्या सर्ववृत्तिनिरोधरूपोऽसंप्रज्ञातोऽपि भविष्यतीति संप्रज्ञातपरंपरायाः फलमिति भावः ॥ अनादित्वेऽपि व्यु
त्थानसंस्काराणां तत्वास्पर्शिनां तत्वस्पर्शिभिः प्रज्ञासंस्कारैः प्रतिबंध इति परमार्थः ॥ प्रज्ञासंस्काराणां तु चित्तनाशेनैव

नाशेनतुसंस्काराणांतस्यतन्नाशकत्वंकल्पनेगौरवात् । संस्काराणांविरोधिसंस्काराभिभावकत्वस्यलोकेबहुशोदृष्टत्वात्सूत्रे
18 संस्कारप्रतिबंधीत्युक्तंनतुतन्नाशकइतिबोध्यं ॥५०॥ सपरिकरंसंप्रज्ञातंनिरूप्यफलकथनेनासंप्रज्ञातंनिरूपयति । तस्यापि
निरोधेसर्वनिरोधान्निर्बीजः ॥ पूर्वपूर्वासंप्रज्ञातेनाक्लिष्टोवनिरुध्यतेतत्संस्कारतानवतस्येव असंप्रज्ञातपरंपरयातस्यापि
प्रज्ञाकृतसंस्कारस्यनिरोधेस्यंताभिभवेजायमानेचरमासंप्रज्ञातोनिर्बीजयोगस्यपराकाष्ठाभवस्यपुनर्व्युत्थानेस्यर्थः ।
सर्वनिरोधादितिनिर्बीजत्वेहेतुः । यतःप्रज्ञानसंस्कारस्त्वात्यंतविलापितावृत्तोदुःखबीजैःसंस्कारादिभिःशून्यत्वान्निर्बीजइति
तत्त्वज्ञानेनप्रारब्धातिरिक्ताखिलकर्मसमाप्तौभोगेनचप्रारब्धसमाप्तौधर्माभावादेवापुनर्जन्मरूपोमोक्षोभविष्यतीति ॥५१॥

मर्थमसंप्रज्ञातेनाखिलसंस्कारोन्मूलनमपेक्षितमितिचेत्·प्रारब्धमप्यनिष्टंस्यादृष्टमितिमोक्षार्थमित्यवेहि·भोगवासना
रूपस्यचसहकारिणउच्छेदेसतिप्रारब्धकर्मणांफलोत्पादेभोगाभावादसत्कल्पइतिदिक्॥५१॥पातंजलानांसूत्राणामुद
यंकुरुतेद्वृत्तिं·वृत्यर्थसंग्रहेपादःआद्योऽभूत्संगतःसतां·ननुव्यंतिमितोत्तयैवेकपरेस्फुटावहुतिषु·सकलावर्जनेनतस्मात्समर्थो
ज्वलिरेषनः इतिसमाप्तःप्रथमोयोगपादः॥तदेवंप्रथमेपादेसमाहितचित्तस्योत्तमाधिकारिणोयोगारोहणयोग्यस्याभ्यास
वैराग्याभ्यामेवक्रियायोगनिरपेक्षाभ्यांयोगनिष्पत्तिंप्रतिपाद्यव्युत्थितचित्तस्यबहिर्मुखस्यापिकथमसौस्वाधीनोभवतीति
तत्साधनान्याह·तपःस्वाध्यायेश्वरप्रणिधानानिक्रियायोगः·तपश्चित्तप्रसादाविरोधिनाशास्त्रोपदिष्टंकृच्छ्रादिः·जपःप्रणवगाय

ध्यायेश्वरप्रणिधानं तस्मिन्फलनिरपेक्षतया सर्वकर्मणामर्पणं न तु प्रथमप्राप्तेन तस्योत्तमाधिकारिणं प्रत्येवोक्त
19 त्वात् एतानि तपःप्रभृतीनि क्रियारूपो योगो योगसाधनत्वादित्यर्थः। यद्यपि वक्ष्यमाणा यमनियमादयः सर्वे क्रियायो
गास्तथापि तेभ्यः समुद्धृत्य प्रकृष्टं साधनत्रयं मध्यमाधिकारिणं प्रत्युपदिष्टं मंतव्यः केवलेनैतेनापि तीव्रतरेण योगो भव
तीति सूचयितुं। १। तस्य योगस्यादिनेद्वारमाह· समाधिभावनार्थः क्लेशतनूकरणार्थश्च। क्रियायोगः सनुवर्त्तितः समाधि
श्चित्तैकाग्र्यस्य भावनायै स्यात्क्लेशांश्च यया योगो भवति क्लेशानां वक्ष्यमाणानां प्रकर्षेण तनूकरणाय च भवति सत्वशुध्या
दिद्वारेणेत्यर्थः। ननु त्वं च विवेकख्यातिप्रतिबन्धकतावच्छेदकस्यासकृत्तस्याभावः। २। किंपुनः क्लेशाः कीदृशा वेत्यत आह· ॥३९॥

अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥ क्लिश्यंत्यनेनेति क्लेशयंति वा क्लेशाः ॥ क्लेशाश्च दुःखनिदानत्वात्ते चाविद्यादयः पंचैवेत्य
र्थः ॥३॥ अविद्यादयोग्रे लक्षणीयाः ॥ आदौ तु स्थूलसूक्ष्माणां सर्वेषामेव क्लेशानां विद्याविरोधेन विधानात्सं वक्ष्यमाणमुप
पादयितुमविद्यामूलत्वमन्यक्लेशानामाह ॥ अविद्याक्षेत्रमुत्तरेषांप्रसुप्ततनुविच्छिन्नोदाराणां ॥ उत्तरेषामस्मितादीनां चतु
र्णां प्रसुप्तादिभेदेन चतुर्विधानामप्यविद्याक्षेत्रं प्रसवभूमिः ॥ यद्यप्यविद्यादिपंचकस्यांतःकरणं प्रसवभूमिस्तथाप्यविद्या
भावरूपेणोपादानसाधर्म्येणाच्च निमित्तकारणस्यापि प्रसवभूमित्वं गौणं ॥ तत्रदद्ग्धयाः ॥ व्यक्तावस्थयावस्थानं ॥ तनुत्वं
तु पूर्वसूत्रे व्याख्यातं ॥ विच्छिन्नत्वं चाल्पप्रतिबंधवशाद्व्यंजकसत्वेप्यंतरांतरानभिव्यक्तिरतः सुषुप्तितोस्य भेदः ॥ व्यंजकवि

20

नह्यग्निजन्मादिबहुकालव्याप्यकाभिव्यक्तेरेवमसुप्तत्वात्· व्यंजकसहकारेणाभिव्यक्तस्य स्वस्वकार्याभिनिर्वर्तकत्वमुदार
त्वं ४ ॥ क्रमेणाविद्यादीन्सूत्रपंचकेन लक्षयति अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या· यथा संख्य
मनित्यादिचतुष्के नित्यादिचतुष्कबुद्धिरविद्या ऽदृश्येचोपलक्षणं· नित्यादिचतुष्केप्यनित्यादिचतुष्कबुद्धिरविद्येत्यर्थः॥ यदाह
राजा· अतस्मिंस्तत्प्रतिभासोऽविद्येत्यविद्यायाः समान्यलक्षणमिति· यद्यपि शुक्तिरजताद्यविद्या अन्या अपि संतितथा
पि संसारकारणत्वाभावान्नतासां सूत्रे परिगणनं परिगणितास्त्वप्यनात्मन्यात्मबुद्धिरेव संसारस्य मूलकारणमन्यासांते
त्वेषत्प्राणतया त्वात्· अविद्यायामंतरे वर्तमानाः स्वयं धीराः पंडितंमन्यमानाः जंघन्यमानाः परियंति मूढा अंधेनैव नीयमाना ॥२०॥

यथांचाद्य इतिश्रुतेः त्रिगुणमयः पुमानिति भिदायदेवो धक्ष्यतेतस्मिन्नेतस्मिन् तत्रानित्ये नित्यबुद्धिर्यथाः ध्रुवापृथिवी अमृतादेवा
इत्याद्याः। अशुचौ शुचिबुद्धिः शरीरं पवित्रमित्यादिः तथा दुःखप्रचुरत्वाद्दुःखे जगति सुखबुद्धिस्तत्प्राचुर्यबुद्धिस्तृतीया अवि
द्या तथा अनात्मनि तत्त्वचतुर्विंशतौ आत्मबुद्धिश्चतुर्थीति ५ ॥ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता दृक् द्रष्टा दृश्यं तेन येन तद्
र्शनं बुद्धिः मलयोपलोपधानं नास्यतः शक्तिपदं दृक्शक्तेर्दर्शनशक्तेश्चैकात्मतेव धर्मतः स्वरूपतश्चासंततमेकाकारा
बुद्धिरस्मिता अहंकार इत्यर्थः। अविद्यातश्चास्मिताया अयं भेदो यद्भ्यासवादो सामान्यतोऽहं बुद्धिर्भेदाभेदसहिष्णुरूढेति
असंताभेदाग्रहणात्सा ऽविद्या ऽस्मिता तु तयोरखण्डत्वभ्रमरूपेति ६ ॥ सुखानुशयी रागः। सुखमनुशेते सुखानुशायी।

2।

सुखज्ञस्यसुखानुस्मृतिपूर्वकःसुखतत्साधनमात्रविषयकगर्द्धस्वरूपःक्लेशोरागइत्यर्थः।मात्रपदाद्विधाव्यावृत्तिः।७।दुःखा
नुशयीद्वेषः।सर्वंपूर्ववत्।८।स्वरसवाहीविदुषोऽपितथारूढोऽभिनिवेशः।पूर्वजन्मस्वसकृन्मरणदुःखानुभवजन्यवासनासं
धःस्वरसस्तेनवहतीतिस्वरसवाही।अपिशब्दसमुच्चितमविद्वांसंतथेतिचछब्दःपरामृशतिरूढःप्रसिद्धः।यथाविदुषस्त
थाविदुषोऽपिस्वरसवाहित्वहेतुनायज्जातीयःक्लेशोभयाख्यःप्रसिद्धःसोऽभिनिवेशइत्यर्थः।विदुषामपिमरणत्रासकृतंभ
यमस्तीतिमाभूयं।९।क्रियायोगःक्लेशतनूकरणार्थइत्युक्तंतत्रक्लेशाव्याख्याताः।इदानींतनूकरणस्यफलंक्लेशदाहइतिवक्तु
मादौदाहस्यफलमाह।तेप्रतिप्रसवहेयाःसूक्ष्माः।तेसूक्ष्माःक्लेशाःयेवासनारूपेणावस्थितानवृत्तिरूपंपरिणाममारभन्ते॥१०॥

तःप्रतिप्रसवेनप्रतिलोमपरिणामेनहेयास्त्यक्तव्यास्त्यक्तुंशक्याः॥धर्मिनाशेनोच्छेत्तुंशक्यन्तेऽस्यार्थः॥ननुदग्धबीजकल्पानांसू
क्ष्माणामनर्थहेतुत्वासंभवात्तदुच्छेदेनपुरुषार्थइतिचेन्न॥क्लेशात्मावच्छेदेनदुःखनिदानत्वस्यकृत्स्नत्वात्क्लेशसामान्याभावेन
नैवपुरुषार्थतायाःस्वरूपत्वाभिप्रेतत्वात्॥१०॥क्लेशानांप्रतिलोमपरिणामसामग्रीमाह॥ध्यानहेयास्तद्वृत्तयः॥क्रियायोगेनसौ
क्ष्म्यंप्रापितानांक्लेशानांवृत्तयःपुनरवीवमवणतयापरिणामाः॥ध्यानेनचित्तैकाग्र्येणहेयाःप्रतिबद्धोत्पत्तिकाःकर्तव्यायाव
क्लेशवासनानामनुसृत्याप्राचीनवासनानामुच्छेदोभवेत्॥११॥क्लेशान्निरूप्यननुकथंतेषांक्लेशात्वमित्याशंक्यापूर्वकंकर्मतस्य
लमूलत्वेनबेधकत्वात्तेषांक्लेशात्वमित्याह॥क्लेशमूलःकर्माशयोदृष्टादृष्टजन्मवेदनीयः॥क्लेशारागद्वेषादयोमूलंयत्रसःक

र्मो एषां क्लेशैरेतैः कर्माशयो धर्माधर्मस्वरूपः सूक्ष्मः संस्कारः। दृष्टादृष्टे वर्तमानभविष्यती जन्मनी ताभ्यां वेदनीयोऽनुभवनीयो
22 भोक्तव्य इति यावत्। रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः कार्योत्यस्य भवेद्दोषात्पुण्यापुण्यमिति स्मृतिः। तद्वशादेव सर्वे
षां सर्वदेहसमुत्थ इति क्लेशमूलः। तत्र नन्दीश्वरविश्वामित्रप्रभृतीनां वर्तमानजन्मन्येवेश्वरादिप्रसादाद्धर्मफलभोगः नहुषपरं
भाप्रभृतीनां च महदवज्ञाकृतो भुजंगमपाषाणदेहपरिणामेनाधर्मफलभोगः। भविष्यज्जन्मनि भोग्यः स्वर्गनरकादिहेतु
द्वितायः प्रायेण सर्वेषां ॥१२॥ अयं च क्लेशालोकानां नास्तीति वदन्पूर्वसूत्रोक्तवेदनीयपदार्थैकदेशसंवेदनं व्याचष्टे सति मूले
तद्विपाको जात्यायुर्भोगाः। धर्माधर्मरूपे कर्माशये सत्येव धर्माधर्मयोर्विपाकः फलं जात्यायुर्भोगरूपं भवति न क्लेशक्षये पापसर्वे ॥१३॥

जातिर्जन्म आयुर्जीवनकालः। भोगश्च सुखदुःखमोहात्मकश्शब्दादिवृत्तिः। अत्र विपच्यत इति विपाकपदस्युत्पत्त्या फलबोधेऽपि आ
रभ्यमाणत्वस्यं तद्विवक्षितं विपाको विज्ञारारंभ इति भाष्यात्तोनिःशेषाविधाक्षयेऽपि जीवन्मुक्तानां प्रारब्धभोग उपपद्यते ॥१३॥
उक्ताभ्यां कर्मगविपाकाभ्यां द्वाभ्यां क्लेशानां मुख्यं फलं बंधफलकमनर्थमाह ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ ते
विपाकाः सर्व एव समुचितसुखदुःखफलकाः समुचितपुण्यापुण्यहेतुत्वादित्यर्थः। एवमयत्नापीतरेतरयोगे द्वंद्वविधानात् सु
खदुःखयोस्तु फलं पुरुषस्य तदुपभोगस्तादिह प्रसिद्धत्वान्तोत्कं तदित्थमनर्थहेतुत्वात् क्लेशास्तनूकरणादिक्रमेण हेया इति
प्रघट्टकार्थः ॥१४॥ ननु ते दुःखफला हेयाः सन्तु सुखफलानां तु कुतस्त्याज्यत्वं तत्राह परिणामतापसंस्कारदुःखैर्गुणवृत्तिवि

गे धाच्च सर्वमेव दुःखं विवेकिनः। परिणामश्च तापश्च संस्कारश्च तान्येव दुःखानि तैः। तथा गुणानां सत्त्वरजस्तमसां यावृत्तयः सु
23 खदुःखमोहात्मिकास्तासां विरोधात्परस्पराभिभाव्याभिभावकत्वलक्षणात्सर्वमुक्तिपरिणामजातं विवेकिनः सुखदुः
खः। तत्र साक्षात्कारवतो दुःखमेव विषयभोगकालेपि तत्र दुःखपरामर्षस्य सद्भावात्। तथा सुखरागापेक्षया दुःखद्वेषस्य बल
वत्त्वात्सुखाकारवृत्तेर्दुःखाकारवृत्त्याभिभूतत्वात्खभोगोपि दुःखरूपतया पर्यवस्यतीति भावः। तत्र परिणामो नाम विषय
स्य कामिनीप्रभृतेर्भविष्यदन्यथाभावस्तस्य त्ववमर्षाद्विषयभोगसुखमपि दुःखमेव विवेकिनो भवति। तापो वर्तमानस्थ। उप
भुज्यमानेषु सुखसाधनेषु तत्क्षतिपंथिनं प्रतिद्वेषकृतसंतापस्य तदानीं सत्वात्। संस्कारो भूतः। स हि विषयभोगनाशोत्तरसे ॥२३॥

त्रैतेन समारब्धः सुखदुःखसाधने पुण्यवृत्तिनिवृत्त्या धुसदुःखस्य जनकः ॥१५॥ तदेवमुक्तस्य क्लेशकर्माशयविपाकराशेरवि
द्याप्रभवत्वादविद्यायाश्च मिथ्याज्ञानरूपायाः सम्यग्ज्ञानोच्छेद्यत्वात्सम्यग्ज्ञानस्य च ससाधनस्य हेयोपादेयावधारण
रूपत्वात्तमाह हेयं दुःखमनागतं अतीतस्य गतत्वाद्वर्तमानस्य च साधनानुष्ठानासंभवात्तृतीयक्षणे नष्टत्वात्संसारिणो यावदना
गतमेव दुःखं हेयमित्यर्थः ॥१६॥ हेयहेतुमाह द्रष्टृदृश्ययोः संयोगो हेयहेतुः द्रष्टा चिद्रूपः पुरुषो दृश्यं बुद्धितत्त्वं तयोरविवेकख्या
तिहेतुको यो सौ संयोगो भोग्यभावेन सन्निधानं स हेयस्य दुःखस्य गुणपरिणामरूपस्य संसारस्य हेतुः कारणं तन्निवृत्त्या
संसारनिवृत्तिर्भवतीत्यर्थः ॥१७॥ द्रष्टृदृश्ययोः संयोग इत्युक्तं तत्र दृश्यस्य स्वरूपं कार्यं प्रयोजनं चाह प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्म

24

वंभोगापवर्गार्थंदृश्यं·प्रकाशः सत्वस्यधर्मःक्रियाप्रवृत्तिरूपारजसःस्थितिःप्रकाशक्रिययोःप्रतिबंधस्तमसःएतत्त्रयंशीलंस्व
भावोयस्यतत्तच्छीलमभिसिद्धंसत्वादित्रयंदृश्यंपुरुषभोग्यत्वेनदृश्यपदार्थत्वाच्चप्रलयेप्रकाशादिकार्याभावात्क्लेशयुक्तःसत्वा
दित्रयस्यप्रकाशरूपतायांहेतुगर्भविशेषणं·भूतेंद्रियात्मकमितिस्थूलसूक्ष्माणांभूतानांतामसानांकारणंतेनस्थितिशी
लत्वंलब्धं·स्थूलानांबाह्येंद्रियाणांस्थानांराजसानांसात्विकानांचसूक्ष्माणामंतःकरणरूपेंद्रियाणांकारणमित्यनेनत्रिशी
लत्वंप्रकाशशीलत्वंलभ्यते·गुणानांस्वरूपसत्ताप्रयोजनमाह·भोगापवर्गार्थमिति·भोगःकथितलक्षणःअपवर्गोविवेक
ख्यातिपूर्विकासंसारनिवृत्तिः।तौभोगापवर्गावर्थःप्रयोजनंयस्यतत्तथेसर्वं॥१८॥नत्वेवंकारणरूपस्यसत्वादिगुणत्रयस्यैवदृ॥२४॥

यस्तं प्राधानविकाराणामित्यतः पर्वविधया कार्यकारणाभेदतस्तानपि संगृह्णाति· विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वा
णि· सत्त्वादिगुणात्मकस्य कंटस्य विशेषादीनि पर्वाणि पर्ववदवस्थाभेदाः न तु ततोन्यं तभेद इत्यर्थः तत्र विशिष्यन्त इति विशे
षाः स्थावृताः कार्यस्वरूपाः षोडश विकारास्ते च एकादशेन्द्रियाणि पंचमहाभूतानि च· अविशेषाः कार्यत्वेपि कारणस्वरूपाः
पंचतन्मात्राहंकारश्च षट्· लिंगं महत्तत्त्वं अलिंगं च साम्यावस्थेति· १९। सूत्राभ्यां दृश्यपदार्थो व्याख्यातः द्रष्टृपदार्थो व्याख्या
यते· द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः· दृशिमात्रो ज्ञानमात्रस्वरूपो द्रष्टृपदार्थः तत्स्वभावप्रमाणमाह शुद्धोपि निर्वि
कारोपि प्रत्ययं बौद्धं वृत्तिजातं त[illegible]दनुकारितमन्यः पश्यति· वृत्तेः स्वग्रहणे जडत्वेन सामर्थ्याविरहात् सामर्थ्ये वा कर्तृकर्मविरोधाद्

25

त्तिप्रवाहकल्पनेनचानवस्थानावृत्तिसाक्षितयापुरुषःसिध्यति· निर्विकारस्याप्यर्थग्राहकत्वमनुग्रहेनोपपादितं वृत्तेर्ह्यर्थग्रहण
मर्थाकारतारूपःपरिणामःस्वप्नादौसिद्धएवास्ति अतःपुरुषस्यापि वृत्तिग्रहणं वृत्त्याकारतावाच्या साचवृत्तिप्रतिबिंबरूपाद्
त्यनुकारितेति· २३ इत्थंद्रष्टरि प्रमाणांतरमाह· तदर्थ एवद्रष्टृत्वस्यात्मा· तस्य पुरुषस्यार्थः प्रयोजनं भोगापवर्गावेव प्रयोजनं यस्य स तदर्थः।
तथा च द्रष्टुर्भोगापवर्गप्रयोजनकमेव द्रष्टृत्वस्यात्मा स्वरूपं कार्यकारणात्मकगुणत्रयं न स्वार्थमित्यर्थः। एवं च गुणाः परार्थाः
संहत्यकारित्वाच्छय्याद्विवदित्यनुमानेन प्रकृत्यादिभ्यो व्यतिरिक्तस्य द्रष्टुः सिद्धिरिति भावः। संहत्यकारित्वं च कार्ये सहकारिसा
पेक्षत्वं २४· ननु पुरुषार्थमेकं चेद्दृश्यं तदा पुरुषस्य मुक्तौ तत्संवेनाप्यत स्थितिहेतोः पुरुषार्थस्य भोगस्याभावादित्यत आह· कृता ॥२५॥

र्थं गतिनष्टमप्यनष्टं तदन्यसाधारणत्वात् । यद्यपि विवेकख्यातिपर्यन्तात् भोगसंपादनात् कमपि कृतार्थं समाप्तभोगं पुरुषं प्रति नष्टं
विरतव्यापारमपि सर्वपुरुषसाधारणत्वादन्यान्प्रत्यनष्टं सव्यापारं भवति । इतोऽतः प्रधानस्य सकलभोक्तृसाधारणत्वान्न कदा
पि विनाश एव स्यात् मुक्तौ सर्वमुक्तिप्रसंगो नास्तीति चोक्तं भवति पुरुषबहुत्वं च ॥ २२ ॥ इदं द्वयोर्व्याख्यातयोः कीदृशः संयोगो हे
यहेतुस्तदुच्यते । स्वस्वामिभावात्तयोः स्वरूपोपलब्धिहेतुः संयोगः स्वं दृश्यं तत्स्वशक्तिर्ज्ञेयत्वेन दृश्यत्वयोग्यता । स्वामी पुरुषस्तस्य
शक्तिर्द्रष्टृत्वेन द्रष्टृत्वयोग्यता अनयोः प्रलयकाले स्वस्वरूपं भोग्यत्वभोक्तृत्वलक्षणमुपलभ्यते । अतः स संयोगो हेतुरुपल
ब्धिहेतुर्यो विलक्षणः संबंधः स उक्तलक्षणोऽसम्पत्त्वात्संयोग इत्युच्यते ॥ २३ ॥ इदं द्वयसंयोगस्यापि कारणमाह तस्येह

तुरविद्या। तस्योक्तलक्षणसंयोगस्य हेतुः कारणमविद्या अनात्मन्यात्मबुद्धिरूपं मिथ्याज्ञानं वासनेत्यर्थः। तस्या एव निरू
26 क्तसंयोगतः प्राक्काले संभवाद्दाव्यक्तेतोक्तत्वाच्च ॥२४॥ एवं हेयं तद्धेतुं चोपपाद्य हानं व्युत्पादयति। तदभावात्संयोगाभावो
हानं तद्दृशेः कैवल्यं। तस्या अविद्याया अभावात्संयोगोच्छेदस्तत्कार्यस्य संयोगस्य दुःखस्य हेयस्य हेतोरभावो यस्तन्निवृत्ति
र्हानं दुःखात्यन्तोच्छेदो यत्तदेव दृशेर्नित्यमुक्तस्य पुरुषस्य कैवल्यं मोक्ष इत्यर्थः ॥२५॥ अत्राप्युपायमाह। विवेकख्यातिरविप्ल
वा हानोपायः। मिथ्याज्ञानवासनया संशयतराभिभवो विप्लवस्तद्धीना विवेकख्यातिः प्रकृतिविवेकतः पुरुषसाक्षात्कारो हा
नस्य मोक्षस्योपायः सवासनाविद्योन्मूलनेन बद्धोरेत्यर्थः। तमेव विदित्वाति मृत्युमेतीति श्रुतेर्ज्ञानातिरिक्तस्य मोक्षसा ॥२६॥

धनत्वाभावात्संप्रज्ञातयोगः किमर्थइतिचेन्न ज्ञानद्वारतयाज्ञानएवासंप्रज्ञातस्यांतर्भावादित्याशयात् २६ विवेकख्यातिर
विप्लवस्यलक्षणमाह तस्यसप्तधाप्रांतभूमिप्रज्ञा तस्यविवेकख्यातिरूपस्यहानोपायस्यप्रांतभूमिकारूपिणीप्रज्ञा
योगजसाक्षात्काररूपिणीसप्तप्रकाराभवतितत्रयथाहेयंदुःखंमयापरिज्ञातंज्ञेनात्रकिमपिज्ञातव्यमवशिष्यतेइतिप्रथमाप्र
प्रज्ञाप्रजायते तथाहेयहेतवोऽविद्याकामकर्मादयोममाशेषाः क्षीणानपुनरेषांक्षेतव्यमस्तीतिद्वितीया तथानिःपादितोमया
विवेकख्यातिरूपोहानोपायोनास्यापरंनिष्पादितव्यमस्तीतितृतीया तथादुःखहानरूपंमोक्षाख्यंफलंतत्क्रोचरसंप्रज्ञा
तघ्येयेससाक्षात्कृतंनेदानींपुरुषार्थस्यापिज्ञातव्यमवशिष्यतेइतिचतुर्थी एषाप्रज्ञाचतुष्टयीस्वस्यकृत्स्नमात्मानुभवरूपा

27

भाविनिर्वीजसमाधिकालिकस्यावस्थानुगतरूपात्प्रान्त्यात्प्रज्ञात्रयी· यथासमाप्तभोगापवर्गाबुद्धिर्भविष्यतीत्येवमाकाराप्रथमा·
तयाबुद्धिरूपेणपरिणताःसत्वादयोगुणाःस्वकारणेलयंमेष्यंतीत्येवमाकाराद्वितीया·तथाप्रलीनानांतेषांपुनर्बुद्धिरूपेण
परिणामोनभविष्यतीत्येवमाकारातृतीयेति· एतस्यामवस्थायांगुणसंबंधातीतःपुरुषःस्वरूपमात्रज्योतिरमलःकेवलीभ
वति·२७॥ विवेकख्यातिर्हानोपायइत्युक्तंतस्यास्तूत्पत्तौनिमित्तमाह· योगांगानुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेकख्यातेः॥
योगांगानिवक्ष्यमाणानितेषामनुष्ठानादशुद्धेःक्लेशात्मकवासनायाःक्षयेसतिज्ञानस्यपृथिव्यादितत्वविषयकस्यदीप्तिस्ता
रतम्येनसात्विकपरिणामप्रकृतिपुरुषसाक्षात्कारपर्यंतभवतीत्यर्थः॥२८॥ कानियोगांगानीत्यतआह· यमनियमासनप्रा ॥२७॥

णायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि· निगदव्याख्यातं॥२९॥ क्रमेणैषां स्वरूपमाह अहिंसासत्यास्तेयब्रह्म
चर्यापरिग्रहा यमाः॥ अहिंसा प्राण्यजिघांसा· सत्यं वाङ्मनसयोर्यथार्थत्वं· अस्तेयं परस्वानपहरणं ब्रह्मचर्यं कामिनीश्रव
णकीर्तनादित्यागपूर्वकमुपस्थसंयमः॥ अपरिग्रहो देहयात्रासाधनातिरिक्तभोगानपेक्षा इत्येते पञ्च यमा इत्युच्यन्ते॥३०॥
तेषां योगिभिरपरेषां विशेषमाह· जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं॥ जातिर्ब्राह्मणत्वादिः॥ देशस्तीर्था
दिः॥ कालश्चतुर्दश्यादिः॥ समयो हव्यकव्यादिः॥ एतैश्चतुर्भिरनवच्छिन्ना ब्राह्मणान्न हनिष्यति तीर्थे न हनिष्ये चतुर्दश्यां न ह
निष्ये हव्यकव्याप्त्यतीक्षेण न हनिष्ये इत्येवं विशेषैरनवच्छिन्ना अनियमितावं॥ चित्त॥ राचित्त॥ सिंक्षिदर्थेन हनिष्यामीत्या

28

दिरूपेणाहिंसासत्यादयः सार्वभौमाः सर्वासु शान्तघोरमूढासु सत्त्वरजस्तमःपरिणामासु चित्तभूमिषु विहिताः महाव्रतमि
त्युच्यते ॥३१॥ यमानभिधाय नियमानाह । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ शौचं मृज्जलादिना बाह्यमा
न्तरं च मैत्र्यादिभिश्चित्तस्य मलानां प्रक्षालनं संतोषो देहयात्रातोऽनुकूललाभेऽपि मनसोऽकालुष्यं तप आदीनि प्रागेव व्याख्या
तानि । पञ्चैतानि नियमा उच्यन्ते ॥३२॥ कथमेषां योगांगत्वमित्यत आह । वितर्कबाधने प्रतिपक्षभावनं वितर्क्यन्त इति वित
र्का वक्ष्यमाणास्तैर्यमादीनां बाधने क्रियमाणे प्रतिपक्षभावनं कार्यं । वितर्कप्रतिपक्षान्यमादीन्भावयेद्यथा योगः सुकरो भवेदेत
एषां योगांगत्वं युक्तमित्यर्थः ॥३३॥ ये वितर्का ये तेषां प्रतिपक्षचिंतनं तदुभयमाह । वितर्का हिंसादयः कृतकारितानुमोदिता लो ॥२८॥

म्क्रोधमोहपूर्वकामृदुमध्याधिमात्रादुःखाज्ञानानंतफलाइतिप्रतिपक्षभावनं॥ यमनियमविपरीताहिंसादयोस्त्रशास्त्रेवि
तर्कशब्देनपरिभाषिताःतेचकृतावाकारितावासाधुसाध्वित्यनुमोदितावास्युस्तथालोभात्क्रोधाद्वामोहाद्वास्युस्त
थामृदवोमध्याअधिमात्रावास्युःसर्वएवदुःखाज्ञानानंतफलाइत्येवंवितर्कप्रतिपक्षस्यदुःखाज्ञानानंतफलकत्वस्यचिं
तनंकुर्यादित्यर्थः।दुःखंचाज्ञानंचतेचानंतेफलंयेषामितिविग्रहः तत्रलोभोनामसत्स्वपिसुखसाधनेषुपुनःपुनःतृष्णा
।क्रोधःकृत्याकृत्यविवेकोन्मूलकःप्रज्वलनात्मकश्चित्तधर्मः।मोहोविवेकाभावसामान्यं॥३४॥दृढज्ञानामप्येषामभ्यासात्स्वक
षंगच्छतामनुनिष्पादितैःसिद्धयोयथाभवंतितथाक्रमेणप्रतिपादयितुमाहअहिंसाप्रतिष्ठायांतत्संनिधौवैरत्यागः॥अ

29

हिंसास्थैर्येसतितस्याहिंसांभावयतःसान्निधौस्थितानांस्वभावविरोधिनामप्यहिनकुलादीनांपरस्परवैरस्यत्यागोभवति
।३५।सत्यप्रतिष्ठायांक्रियाफलाश्रयत्वंतत्सान्निध्यावित्युनुवर्त्ततेसत्यस्थैर्येसतितस्यसत्यंभावयतःसन्निधौस्थितानाम
न्येषांतद्वचनमात्रेणक्रियायायागादिरूपायाःफलंस्वर्गादितदाश्रयत्वंभवति।३६।अस्तेयप्रतिष्ठायांसर्वरत्नोपस्थानंत
स्यसत्तावत्समासघटकमपिविच्छिद्येहानुवर्त्ततेस्यस्थेस्यर्थः।३७।ब्रह्मचर्यप्रतिष्ठायांवीर्यलाभः।इहापितस्येत्येव·ब्रह्म
चर्यस्थैर्येसतितस्यवीर्यंदेहेन्द्रियमनःसुप्रकर्षमागच्छतियेनस्वीयंज्ञानादिविनेयेषुसंक्रामयितुंप्रभुर्यात्·३८।अपरिग्रह
स्थैर्येजन्मकथंतासंबोधः।अपूर्वेणदेहेन्द्रियादिसंधानेनज्ञानेहेतुःसंयोगोजन्मतस्यकथंतायाःकिंप्रकारतायाअतीत।।२१।

वर्त्तमानभाविभावस्वरूपायाः संबोधः साक्षात्कारोऽपरिग्रहस्थैर्ये सति भवतीत्यस्यैव ॥ ३९ ॥ उक्ता यमसिद्धयः नियमसिद्धय उ
च्यंते । शौचात्स्वांगजुगुप्सा परैरसंसर्गः ॥ शौचादिति ल्यब्लोपे पंचमी । शौचं प्रतिष्ठाय स्थिरीकृत्य स्वांगे स्वशरीरेऽशुद्धिमपश्य
तो जुगुप्सा अशुचिस्वभावमिदं शरीरं नात्राहंकारः कर्त्तव्य इत्येवंरूपा भवतीत्यस्यैव तथा एवं शौचपरस्य कायो मम न शु
ध्यन्ति विस्मृतप्रमत्तस्य परस्य काय इति दोषदर्शिनः परैः परशरीरैः संसर्गश्च भवतीत्यर्थः ॥ ४० ॥ बाह्यशौचं स्थैर्ये सिद्धिमुक्त्वांतः
शौचसिद्धिमाह सत्त्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानि च ॥ शौचादिति ल्यब्लोपे पंचम्यंतमस्येति चानुवर्त
ते भवंतीति च वाक्यशेषः । चित्तमलक्षालनरूपं शौचं प्रतिष्ठाय स्थितस्य तस्य तां प्रतिष्ठां भावयतः सत्त्वस्य शुद्धिस्तदुद्रेक

30

स्ततः सौमनस्यं स्वाभाविकी प्रीतिस्ततः प्रीतचित्तस्याविक्षेपादैकाग्र्यं तत इंद्रियजयस्ततश्चात्मसाक्षात्कारयोग्यत्वमित्यर्थः
॥४१॥ संतोषादनुत्तमं सुखं· पंचमी पूर्ववत्· संतोषं प्रतिष्ठायस्थितस्यानुत्तमसुखस्य लाभो भवति· यस्य सुखस्य विषयसुखं शतां
शेनापि समं न भवेत्तस्यैव·॥४२॥ कायेंद्रियशुद्धिरशुद्धिक्षयात्तपसः॥ तपस इति पंचमी पूर्ववत्· तपः प्रतिष्ठाय स्थितस्य कायें
द्रिययोः शुद्धिर्भवति अशुद्धिक्षयादिति· अशुद्धिक्षयस्य द्वारताहेतुः पंचम्योच्यते· अशुद्धिः पापं तमोगुणश्च· कायसिद्धि
रणिमाद्या· इंद्रियसिद्धिर्दूरश्रवणाद्या विभूतिपादे व्याख्यास्यते·॥४३॥ स्वाध्यायादिष्टदेवतासंप्रयोगः॥ पंचमी पूर्ववत्स्वा
ध्यायं प्रतिष्ठाय स्थितस्येष्टदेवतया संप्रयोगः स्पर्शनभाषणादिलक्षणो भवति तस्येत्येवं·॥४४॥ समाधिरीश्वरप्रणिधा ॥३०॥

नात्र॰ पंचमी प्राग्वत् ईश्वरप्रणिधानं प्रतिष्ठायस्थितस्य समाधिसिद्धिर्भवति॰ सर्वकर्मार्पणाद्भगवानीश्वरः प्रसन्नः सन्नंतरा
यान्परिहृत्य समाधिमुद्बोधयति तस्य तस्यैव॰ ४५। यमनियमाः सहतत्सिद्धिभिरुक्ता आसनमुच्यते स्थिरसुखमासनं स्थिरं
निश्चलं सुखावहं च यत्तदासनं तद्योगांगमित्यर्थः। आस्यतेऽनेनेत्यासनं तद्द्विविधं बाह्यमांतरं च तत्र चैलाजिनकुशोत्तरं बा
ह्यमांतरं पद्मस्वस्तिकावीरासनादि विशेषः तत्र पद्मासनं प्रसिद्धं॰ सव्यमाकुंचितचरणं दक्षिणं च सव्योर्वंतरा क्षिपेदिति स्व
स्तिकासनं॰ द्वे पाष्णीतले वृषणतले संपुटीकृत्य संपुटोपरि पाणिसंपुटिकां न्यसेदिति वीरासनं अन्येप्यासनविशेषा हठयो
गग्रंथेभ्यो ज्ञेयाः। ४६। आसनस्थैर्योपायमाह प्रयत्नशैथिल्यासमापतिभ्यां॰ स्वाभाविकः प्रयत्नश्चलत्वादासनवि

31

ध्यानस्तस्यमुपरमस्तेनासनंनिष्पद्यतेतथानंते पृथ्वीधारिणि नागनायके समापत्तिश्चित्तस्य धारणं तया च ॥४७॥ आसनस्थैर्ये
सिद्धिमाह· ततो द्वंद्वानभिघातः ॥ ल्यब्लोपे पंचमी पूर्ववत्· ततस्तस्मादासनमधिष्ठाय स्थितस्य द्वंद्वैः शीतोष्णादिभिरनभि
घातश्चेतनाऽशक्तेः प्रातिकूल्येन वृत्तेरभावो भवतीत्यर्थः ॥४८॥ क्रमप्राप्तं प्राणायाममाह· तस्मिन्सति श्वासप्रश्वासयोर्गतिवि
च्छेदः प्राणायामः ॥ तस्मिन्नासने सति श्वासप्रश्वासयोः ॥ आस्योत्करीस्यास्वाभाविकगतिविच्छेदः प्राणायाम इति वक्ष्यमाण
चतुर्विधप्राणायामस्य सामान्यलक्षणं· तथासनस्थैर्यगत्वलाभार्थं सत्स्वंतं श्वासप्रश्वासौ च नासापुटेन वायोः प्रवेशनिर्ग
मौ लोकप्रसिद्धौ तत्कालेऽस्याः स्वाभाविकी प्रवृत्तिस्तन्निषेध इत्यर्थः ॥ अतो न श्वासप्रश्वासयोर्गत्यनुपपत्तिदोषः ॥४९॥ अवांग ॥३७॥

रंभेदानाह बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घःसूक्ष्मः ॥ प्राणायामस्त्रिविधः ॥ बाह्यवृत्तिराभ्यंतरवृत्तिः
स्तंभवृत्तिरिति तत्र कोष्ठस्य वायोरेचनेन बहिरेव धारणमाघोरेचकः ॥ स्मृतः ॥ बाह्यस्य वायोः पूरणेनांतर्गतस्यांतरेव धारणम
भ्यंतरवृत्तिः स च पूरकः ॥ रेचनपूरणप्रयत्नं विना प्राणस्यैकयत्ने विधारकप्रयत्नेन गतिविच्छेदः स्तंभवृत्तिः स च कुंभकः ॥ नायं रे
चकोंतःस्थत्वात् नापि पूरकः ॥ तप्तशिलासन्निहितजलबिंदुवच्छरीरे प्राणस्य संकुचितत्वेन सूक्ष्मत्वात् यो हि स्थूलोंत
र्निरुद्धो देहं पूरयति स पूरकः ॥ तस्माद्रेचनपूरकाभ्यासेन विनासकृत्प्रयत्नमात्रेण सूक्ष्मतमस्य प्राणस्य कुंभस्थितघट
जलवन्निश्चलत्वेन देहेवस्थानात्कुंभकत्वमस्य त्रिविधोप्ययं देशकालसंख्याभिर्यदा परिदृष्टो निर्णीतो नियमितो भव

तिनदाभ्यासवशात्क्रमेण दीर्घसूक्ष्मसंज्ञो भवतीति वाक्यार्थः। एतावता देशेनैतावता कालेन वा एतावतीभिर्मात्रासंख्याभिर्वा
32 परिच्छिन्नो मयास्य रेचकादिः कर्तव्य इत्येवमवधारितइति परिदृष्टं तद्विशेषणार्थः। तत्र नासाग्रात्प्रादेशवितस्तिहस्तादिपरि
मितो बाह्यो देशो रेचकस्य विषयः। शास्त्र्यनुसारात्स चेषीकातूलक्रियया निश्चेयः। पूरकस्यापादतलमस्तकमाभ्यन्तरो विषयः
स च पिपीलिकास्पर्शसदृशेन स्पर्शेनानुमेयः। कुम्भकस्य पूरकदेशादेव विषयः। त्रयाणां सहानुष्ठाने पूरकानन्तरं कुम्भकस्मरणात्
स च तूलक्रियया तत्स्पर्शस्यानुपलब्ध्या निश्चेयः। एवं देशपरिदृष्ट उक्तः। कालपरिदृष्टस्तु क्षणगणनया ज्ञेयः। संख्याप
रिदृष्टोऽपि मात्राप्रमाणेन यथा स्वजानुमंडलं पाणिना त्रिः परामृश्य छोटिकावच्छिन्नः कालो मात्रा सा हि स्वस्थस्य पुंसः श्वासप्र ॥३२॥

श्वासाभ्यांमितानाभिः षड्विंशन्मात्राभिर्दीर्घइतिपरिदृश्यते· अधिककालव्यापित्वंप्राणनिरोधस्यदीर्घत्वंयथायथादीर्घ
33 इतिपरिदृश्यतेनयातथाप्राणस्यसूक्ष्मत्वेनसूक्ष्मोनादीर्घएवपरमनैपुण्यात्सूक्ष्मइतिपरिदृश्यतेननुमंदत्वायेत्यर्थः॥५०॥केवल
कुंभकरूपंप्राणायामस्यचतुर्थंभेदमाह बाह्याभ्यंतरविषयाक्षेपीचतुर्थः॥ बाह्याभ्यंतरविषयौबाह्याभ्यंतरवृत्तिपूर्वकसू
त्रोक्तौरेचकपूरकौतयोराक्षेपीअतिक्रमीतावतिक्रम्यकेवलोयायत्नइतियावत्सपूर्वसूत्रोक्तरेचकादित्रयापेक्षयाचतुर्थः
प्राणायामइत्यर्थः उक्तंचवासिष्ठसंहितायां·रेचकंपूरकंत्यक्त्वासुखंयद्वायुधारणं· प्राणायामोयमित्युक्तःसवैकेवलः॥ कुंभ
कः॥ सहितंकेवलंवापिकुंभकंनित्यमभ्यसेत्·यावत्केवलसिद्धिःस्यात्तावत्सहितमभ्यसेत्·केवलेकुंभकेसिद्धेरेचपूरकवर्जि

ते । न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यत इति ॥४९॥ योगस्य द्वारभूतं प्राणायामस्य सिद्धिमाह द्वाभ्यां । ततः क्षीयते प्रकाशा
वरणं व्यक्तोपपंचमी प्राग्वत् । ततः प्राणायामे प्रतिष्ठायां स्थितस्य योगिनश्चित्तप्रकाशो विवेकस्तस्यावरकं कर्म दृष्टरूपं
क्षीयत इत्यर्थः ॥५२॥ धारणासु च योग्यता मनसः ॥ प्रकाशावरणक्षये सति मनसो वक्ष्यमाणासु धारणासु क्षमता भवति ॥५३॥
क्रमागतं प्रत्याहारं लक्षयति । स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहारः ॥ इन्द्रियाणां स्वस्वविषयासन्निक
र्षकाले ध्यानादौ या चित्ताकारानुकारिता भवति सा प्रत्याहार इति फलद्वारकं लक्षणं । अजितेन्द्रियाणां तु ध्यानादिकाले चि
त्तमिंद्रियानुकारि भवति तदानीमपि रूपादिभिश्चित्ताकर्षणादिति । इंद्रियाणां विषयशून्यानां चित्ताभिमुख्यं स्वरसतो भा ॥५४॥

स्वानीति योगार्थइत्यर्थः॥५५॥ योगेव्यापारभूतामेवप्रत्याहारस्यसिद्धिमाह॥ ततःपरमावश्यतेन्द्रियाणांपंचमीप्राग्वत् ततःप्रत्याहा
रंप्रति स्वायत्तस्येन्द्रियाणिते षांपरमोजयोभवति चित्तनिरोधान्तरमेव वृत्तिभावेवच्चरमजयइत्युच्यते॥५५॥पातंजलानांसू
त्राणामुदयंकुरद्दर्शिनि·वृत्त्यर्थसंग्रहेपादोद्वितीयःसंगतोगतः॥ नतुयमनियमतोकथंकेपरमूढा बहूनिषु·सकलावर्जनेनतस्मात्स
मर्थोजल्लिरेषनः॥ इतिसाधनपादोद्वितीयःसमाप्तः॥ तदेवंद्वितीयपादेक्लेशानन्तरकरणद्वारायोगसाधनंक्रियायोगंनिरूप्यसप्र
पंचक्लेशाःकर्मविपाकानुक्तानेषांहेयत्वार्थंदुःखत्वंदर्शयित्वाहेयतद्धेतुमोक्षतद्धेतून्अनुपन्यस्ययोगस्यबहिरंगंयमादिपंचक
मुवांतरफलसहितंनिरूप्यसंप्रतिधारणादित्रितयमंतरंगंसंयमसंज्ञंवदन्संयमसाध्याविभूतयःश्रद्धाद्वारोकैवल्यफल

के योग प्रवृत्तिहेतवोक्तव्याङ्गानि पादान्तरमारभमाणो धारणां तावदाह देशबंधश्चित्तस्य धारणा देशो हृदयोदरादि रूपे बंध
एकाग्र्ययश्चित्तस्य ध्येयचिंतनार्थे सा धारणेत्यर्थः ॥१॥ क्रमागतं ध्यानं लक्षयति तत्र प्रत्ययैकतानता ध्यानं तत्र तस्मिन्देशे ध्येयचि
तं धृतं तत्र प्रत्ययस्य ज्ञानस्य या एकतानता विसदृशापरिणामपरिहारद्वारेण यदेव धारणायामालंबनी कृतं तदालंबनतये
व निरंतरमुत्पत्तिः सा ध्यानमित्यर्थः ॥२॥ समाधिमाह तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ मात्रपदस्य विवरणं स्व
रूपशून्यमिवेति इवशब्देन ध्यानस्य सत्तां द्योतयति यथा स्वच्छस्फटिकमणिः कुसुमरूपेणैवभासते तद्वदित्यर्थः ॥ विजाती
वृत्तिविच्छिन्ना धारणा अविच्छिन्नं ध्यानं ध्येयध्यानध्यातृविभागरहितध्येयमात्राकारता समाधिः स एव दीर्घकालव्या ॥३४॥

पी संप्रज्ञातो ध्येयस्फूर्तिशून्यो ऽसंप्रज्ञात इति विवेकः ॥३॥ धारणादित्रयस्य व्यवहारलाघवाय तां त्रिकीं संज्ञामाह· त्रयमेक
त्र संयमः ॥ एकविषयं त्रयं संयमसंज्ञं स्यात् ॥४॥ संयमसिद्धयो ऽग्रे वक्ष्यंते इदानीं संयमस्य योगागमप्रयोजकं द्वारमाह· त
ज्जयात्प्रज्ञालोकः ॥ तस्य संयमस्य जयात्स्थैर्यात्प्रज्ञायाः समाधिजाध्याः आलोको नैर्मल्यं भवति भ्रांतिसंशयादिमल
शून्या ध्येयतत्त्वस्फूर्तिर्भवतीत्यर्थः ॥५॥ संयमस्यानुष्ठाने विशेषमाह· तस्य भूमिषु विनियोगः ॥ स्थूलसूक्ष्मादिषु उक्ताः
सवितर्क निर्वितर्क सविचार निर्विचारादयः संप्रज्ञातयोगावस्था एव भूमयस्तासु संयमस्य विनियोगः संयमेन पूर्वभूमि
काजयानंतरमुत्तरभूमिकासु विनियोजनं कार्यमित्यर्थः ॥६॥ तु नु योगांगानां मध्ये ऽंगपंचकं पूर्वपादे निरूपितं त्रयमत्र नि

35

रूप्यते तत्र को हेतुस्तत्राह· त्रयमंतरंगं पूर्वेभ्यः ॥ उत्तर सूत्रानुरोधादिह संप्रज्ञातारव्य विशेषलाभः तत्र समाधिप्रतिबध
कस्य चित्तक्षायप्राणेंद्रियमलनिवृत्ति द्वारा यमादिपंचकस्य बहिरंगत्वं धारणादित्रयस्यांगिनः समानविषयतया साक्षा
त्स्वरूपोपकारकत्वादंतरंगत्वमिति बोध्यं ७ तदपि बहिरंगं निर्बिजस्य· निर्बिजोऽसंप्रज्ञातः तस्य धारणात्रियमपि बहि
रंगमेव भवति· विवेकख्याति परवैराग्य द्वारा परंपरयैव तद्धेतुत्वेन तज्जन्मांतरायेणासंप्रज्ञातैर्भवादित्यर्थः ॥८॥ व्याख्याता सं
प्रज्ञातनियोगांगानि संप्रतियोगांग समाधेरंगिनोऽर्थयोगयोः स्वरूपभेदाद धारणा पतत्त्वस्यानुविशेषावक्तव्यास्तावेत
व तयोरंगांगिनोः प्रयोजनमपि प्रतिपादितं भविष्यति· तत्रादावंगसमाध्यसंप्रज्ञातयोगियोगयोरवस्थायांविशेषमाह· ॥३५॥

व्युत्थानसंस्कारनिरोधसंस्कारयोरभिभवप्रादुर्भावौनिरोधक्षणचित्तान्वयोनिरोधपरिणामः।व्युत्थाननिरोधश्चयोग
द्वयसाधारणमेवाचख्यौकेवलस्यासंप्रज्ञातस्यग्रहणेसंप्रज्ञातकालीकपरिणामाकथनान्न्यूनताप्रसंगात्अभिभवप्रा
दुर्भावौचह्रासवृद्धी।तथाचव्युत्थानसंस्कारस्यह्रासोवृत्तिनिरोधसंस्कारस्यवृद्धिर्निरोधकालिकःपरिणामःसचनिरोधक्ष
णचित्तान्वयःनिरोधस्यसर्वेषुक्षणेषुचित्तान्वयश्चित्तमात्रान्वयविषयव्यतिरेकेणतदन्वयइत्यर्थः।९।ननुवृत्तिनामेवस्मृति
हेतुतयासंस्कारजनकत्वंसिद्धंनिरोधस्यतुसंस्कारजनकत्वेकिंप्रमाणंतत्राह।तस्यप्रशान्तवाहितासंस्कारात्।तस्यनिरोध
स्यप्रशांतवाहितानिश्चलप्रवाहःस्वसंस्कारादिवभवतीत्यर्थः।परिहृतविक्षेपतयैवचित्तस्यवृत्तिविशेषोनिरोधइतिभावः

।१०। अंगसमाधेरवस्थाविशेषमाह: सर्वार्थतैकाग्रतयोः क्षयोदयौ समाधिपरिणामः। सर्वार्थता विक्षिप्तता तस्याः क्षयस्तिरस्का
र एकाग्रतायाश्चाविर्भावोदयस्तौ समाधिपरिणामः समाधिकाश्चित्तस्य परिणाम इत्यर्थः।११। अंगसमाधेरेवोक्तपरिणामानंत
रकालिकं परिणामान्तरमाह: शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः। शान्तोऽतीतः उदितो वर्तमानस्तावेकविषयत्वेन
तुल्यौ प्रत्ययौ चित्तस्यैकाग्रताकालिकः परिणामः नैरन्तर्येण वृत्तिद्वयं चित्तस्यैकाग्रताख्यः परिणाम इत्यर्थः।१२। चित्तपरिणा
मेषु निरोधे समाध्येकाग्रतारूपेषूक्तेष्वयमन्यत्राप्यतिदिशति: एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः।१
तेन चित्तस्य परिणामेन भूतेषु पृथिव्यादिधर्मिषु चक्षुरादीन्द्रियेषु च धर्मपरिणामो लक्षणपरिणामो ऽवस्थापरिणामश्च ।३५॥

त्रिविधाः परिणामा व्याख्याता भवंति· एतैः परिणामैः शून्यं क्षणमपि न किंचिद्वस्त्ववतिष्ठत इत्यर्थः परिणामश्चान्यथात्वं
तत्र धर्मिणो धर्मैः परिणामो यथा मृद्धर्मिणः पिंडरूपधर्मापाये घटधर्मोत्पत्तिः। धर्माणां च लक्षणपरिणामो यथा· पिंडस्य वर्त
मानलक्षणापायेतीतलक्षणोत्पत्तिः। घटस्य चानागतलक्षणापाये वर्तमानलक्षणोत्पत्तिः। अनागतवर्तमानातीताव
स्थासु च तांत्रिकी लक्षणपरिभाषा लक्षयति कार्यरूपं धर्मं व्यावर्तयतीति योगात्· लक्षणानां चावस्थापरिणामो यथा·
वर्तमानलक्षण एव घटः प्रतिक्षणं नवपुराणावस्थाभिरन्यथात्वमेति· यद्यपि सर्व एव परिणामास्तत्त्वतो धर्मिण एव
धर्मातीतानां परमार्थतो धर्मिस्वरूपत्वात्तथापि व्यावहारिकावांतरभेदेनादर्शोपि विभाग उच्यते· १३। स्यादेतत्· मास्तु ध

37

र्मातिरिक्तोधर्मी·प्रमाणाभावात्·तत्कस्यधर्मादेः परिणामःस्यादितिबौद्धःप्रत्यवतिष्ठते·तन्निराकुर्वन्·धर्मेभ्योविविक्तो
धर्मिणंसाधयति·शान्तोदिताव्यपदेश्यधर्मानुपातीधर्मी·शान्ताअतीताउदितावर्तमानाअव्यपदेश्याःशक्तिरूपेण
मृदादिषुधर्मिषुस्थिताअनागतास्तेषुधर्मेष्वनुपातीवर्तमानरूपेणानुगतोयःसधर्मीत्यर्थः॥१४॥स्यादेतत्·अस्तुधर्मे
भ्योऽतिरिक्तोधर्मीतथाप्येकस्यधर्मिणएक,एवपरिणामोयुक्तः·नह्येकरूपात्कारणात्कार्यभेदोभवितुमर्हतीतितस्याकस्मि
कत्वप्रसंगात्·ततःसहकारिसमवधानाद्भविष्यतीतिचेन्न·गौरवात्·तस्मात्कुर्वद्रूपत्वेनैवएक,एवपरिणामोऽस्त्वितिपु
नरपिबौद्धःप्रत्यवतिष्ठते·तत्राह·क्रमान्यत्वंपरिणामान्यत्वेहेतुः।एकस्यधर्मिणःपरिणामनानात्वेक्रमभेदोहेतुर्लिङ्गं॥१५॥

गमित्यर्थः॥ क्रमभेदस्य यथा मृद्धर्मी प्रथमं चूर्णभावं हित्वा पिंडभावमाप्नइत्येकः॥ ततश्च पिंडभावं हित्वा कपालभावमाप्नइत्य
परः क्रमइत्येवमादयो मृदः परिणामक्रमभेदाः सर्वत्र च मृत्त्वमृत्त्वमनुगतमस्य यान्मृदेकत्वमिति॥१५॥ नउत्तरमापादपरि
समाप्तेः संयमसिद्धिरूपा विभूतय उच्यंते॥ परिणामत्रयसंयमादतीतानागतज्ञानं॥ अस्य धर्मिणोयं धर्मपरिणामस्त
स्य चायं लक्षणपरिणामस्तस्याप्ययं नवपुराणाद्यवस्थापरिणामइत्येवंरूपपरिणामत्रयसंयमाद्योगिनोतीतानागत
ज्ञानं भवति यतश्चित्तस्य शुद्धसत्वप्रकाशरूपत्वात्सर्वार्थग्रहणसामर्थ्यं रजस्तमोमलप्रतिबंधेनापहियते तैस्तैरूपायै
स्तदुभयज विक्षेपापहारे सति निवृत्तमलस्येवादर्शस्य सर्वार्थग्रहणसामर्थ्यमेकाग्रतावलादाविर्भवतीत्यर्थः॥१६॥

संयमांतरास्तिध्यंतरमाह। शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं। शब्दः श्रोत्रें
द्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थव्यवच्छिन्नः। पूर्वपूर्ववर्णसंस्कारसध्रीचीनचरमवर्णबुद्धिनिर्ग्राह्यः स्फोटा
त्मा वा। अर्थो जातिगुणक्रियासंज्ञास्वरूपः। प्रत्ययो ज्ञानं विषयाकारा बुद्धिवृत्तिः। एषां शब्दार्थप्रत्ययानां व्यवहारे इतरेतरा
ध्यासाद्भिन्नानामपि बुध्येकरूपतापादनात्संकीर्णत्वं तथा हि। गामानयेत्युक्ते कश्चिद्गोलक्षणमर्थं गोत्वजात्यवच्छिन्नं
सास्नादिमत्पिंडरूपं शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकमभेदेनैवाध्यवस्यति न त्वस्य गोशब्दो वाचकोऽयं च शब्दस्य वाच्य
स्तयोरिदं ग्राहकं ज्ञानमिति भेदेन व्यवहारस्तत एव कोऽयमर्थः कोऽयं शब्दः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं ॥३८॥

इदानींगौरिति· स यद्येकरूपतां न प्रतिपद्येत कथमेवरूपमुत्तरं प्रयच्छति· एवं स्थिते योयं प्रविभाग इदं शब्दस्य तत्त्वं यच्छ्रो
त्रेंद्रियग्राह्यमिदमर्थस्य यत्तदितरचक्षुरादींद्रियग्राह्यमिदं ज्ञानस्य यद्विषयेंद्रियसंयोगादुद्भवतीति तस्मिन्प्रविभागे यः
संयमस्तस्मात्सर्वभूतानां पशुपक्ष्यादीनां रुतस्योच्चारितशब्दस्य ज्ञानं भवति· अनेनाभिप्रायेणानेनायं शब्द उच्चारित
इति सर्वं जानाति· अस्मदादीनां तु श्रोत्रेंद्रियभेदसाक्षात्कारे सत्यपि तस्य साक्षात्कारस्य संयमजन्यत्वाभावान्न सर्वरु
तकृतज्ञानं भवति किंतु तज्ज्ञानं योगिनामेव भवतीत्यर्थः ॥१७॥ सिध्यंतरमाह· संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं· संयमा
दित्येतावत्पूर्वसूत्राद्विच्छिद्येह संबध्यते संयमात्तत्पूर्वकं संस्कारस्य साक्षात्करणाज्जन्मांतरस्मरणं भवतीत्यर्थः।

39

संस्काराद्विविधाः केचित्स्मृतिमात्रोत्पादनफलाः अपरे जात्यायुर्भोगलक्षणविपाकहेतवो धर्माधर्मरूपाः ।१८। सिद्ध्यं
तरमाह: प्रत्ययस्य परचित्तज्ञानं संयमात्साक्षात्करणादित्युभयमिह विच्छिद्य संबध्यते प्रत्ययस्य रागादिमत्तापरचि
त्तवृत्तेर्मुखरागादिना केन चिल्लिंगेन गृहीतायाः संयमात्पूर्वे साक्षात्करणात्परचित्तस्य साक्षात्कारो भवतीत्यर्थः ।१९। सिद्ध्यं
तरमाह: कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंप्रयोगेंतर्द्धानं साक्षात्करणादिति वर्त्तते कायस्य शरीरस्यैरं
स्थूलस्य रूपं चक्षुर्ग्राह्यः सूक्ष्मो गुणस्तस्मिन्नस्मिन्काये रूपमिति संयमाद्यः साक्षात्कारस्तस्मात्तस्य रूपस्य चक्षुर्ग्रा
ह्यत्वरूपाया शक्तिस्तस्याः स्तंभे भावनावशात्प्रतिबंधे चक्षुःप्रकाशासंप्रयोगे परचक्षुःकिरणैरसंबंधेंतर्द्धानं योगि ।।२१।।

नोभवतिनकेनचिदसौऽदृश्यतइत्यर्थः॥२०॥एतेनशब्दाद्यन्तर्धानमुक्तं॥ एतेनरूपान्तर्धानोपायप्रदर्शनेनशब्दादीनां
स्वीयानांपरश्रोत्रादिग्राह्याणामन्तर्धानमुक्तंवेदितव्यं॥२१॥सिध्यन्तरमाह॥ सोपक्रमंनिरुपक्रमंचकर्मतत्संयमादप
रान्तज्ञानमरिष्टेभ्योवा॥ साक्षात्करणादित्यनुवर्तते॥ उपक्रमेणकार्यकरणाभिमुख्येनसहवर्तते सोपक्रमंतीव्रवेगेनफ
लजनकं॥ यथोष्णदेशेप्रसारितंवासःशीघ्रमेवशुष्यति॥ उक्तविपरीतरूपंनिरुपक्रमंमन्दवेगेनफलजनकं॥ यथातदेवार्द्रं
वासःसंवर्तितमनुष्णदेशेचिरेणशुष्यति॥ यदस्मिन्द्विविधेकर्मणिसंयमाद्यःसाक्षात्कारस्तस्मात्॥ परस्यप्रजापतेरन्तो
महाप्रलयः॥ नरादीनांमरणमपरान्तस्तस्यज्ञानममुष्मिन्देशेऽमुष्मिन्कालेममदेहवियोगइतिसाक्षात्कारोभवतीस्य

र्थः। तत्र सोपक्रमकर्मसाक्षात्कारेण द्विपाकस्य झटिति भोगार्थं बहुशरीराणि गृहीत्वा योगी स्वेच्छया म्रियते एवं नतु
तद्भोगे मरणविलंबः। प्रसंगादाह अरिष्टेभ्यो वेति अरिष्टानि त्रिविधानि आध्यात्मिकाधिभौतिकाधिदैविक
भेदेन तत्राध्यात्मिकानि पिहितकर्णपुटस्य प्राणघोषाश्रवणादीनि आधिभौतिकान्यकस्माद्विकृतपुरुषदर्शनादी
नि आधिदैविकान्यकाल एव द्रष्टुमशक्यस्वर्गादिपदार्थदर्शनादीनि तेभ्यो वा मरणज्ञानं भवत्यस्य योगिनोपीत्यर्थः
॥२२॥ परिकर्मनिष्पंदभूताः सिद्धीः प्रतिपादयितुमाह मैत्र्यादिषु बलानि संयमात्साक्षात्कारणादित्यनुवर्त्तते मैत्री
करुणामुदितासु संयमपूर्वकात्साक्षात्कारान्मैत्र्यादिसंबंधीनि बलानि प्रादुर्भवंति मैत्रीकरुणामुदितास्तथास्य ।२४॥

प्रकर्षं गच्छंति यथा सर्वस्य मित्रत्वादिकमयं प्राप्तपधनो॥२३॥ सिध्यंतरमाह॥ बलेषु हस्तिबलादीनि॥ संयमात्साक्षात्का
रादिसेव हस्तिहनुमद्गरुडादिषु बलेषु तन्द्भावेन संयमपूर्वकात्साक्षात्कारात्तानि बलानि योगिनः प्रादुर्भवंति॥२४॥
सिध्यंतरमाह प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं ज्योतिष्मती प्रवृत्तिः प्रथमपादे उक्ता तस्या य आलोकः
सात्त्विकः सत्त्वप्रकाशस्तस्य विषयेषु न्यासात्तद्वासितानां विषयाणां भावनात्सांतःकरणेष्विंद्रियेषु प्रकृष्टशक्तिता
मापन्नेषु सूक्ष्मस्य परमाण्वादेर्व्यवहितस्य भूम्यंतर्गतनिध्यादेर्विप्रकृष्टस्य मेर्वपरपार्श्ववर्त्तिनो रसायनादेर्ज्ञानमुत्प
द्यते॥२५॥ एतत्समानवृत्तांतं सिध्यंतरमाह॥ भुवनज्ञानं सूर्ये संयमात्॥ साक्षात्करणादित्यनुवर्त्तते॥ सूर्ये प्रकाशमये संयम

पूर्वकसाक्षात्कारात्भूरादिलोकेयान्यवांतरभुवनानितत्सन्निवेशभांजिपुराणोक्ततद्विषयेयथावदस्यज्ञानमुत्पद्यते· पू
र्वसूत्रेसात्विकप्रकाशआलंबनतयोक्तःस्तत्रनास्तिसंयमापेक्षाःइहतुभौतिकप्रकाशआलंबनमितिसतिसंयमापेक्षे
41 तिविशेषः२६भौतिकप्रकाशांतरालंबनद्वारेणैवसिध्यंतरमाह· चंद्रेताराव्यूहज्ञानं· संयमादित्यनुवर्त्ततेसाक्षात्का
रणादितिच· चंद्रेसंयमपूर्वकासाक्षात्कारात्ताराणांनक्षत्राणांव्यूहस्यसन्निवेशविशेषस्यज्ञानंभवति· सूर्यस्यनक्ष
त्राभिभावकत्वात्तत्संयमस्यात्तज्ञानजनकत्वासंभवादितिभावः२७ध्रुवेतद्गतिज्ञानंसंस्कारात्साक्षात्करणादित्ये
व· ध्रुवेनिश्चलेज्योतिषांप्रधानेसंयमपूर्वकात्साक्षात्कारात्तासांताराणांयागतिःप्रत्येकंनियतकालानियतकाला ॥४१॥

नियतदेशाचरस्याज्ञानमुत्पद्यते २८। बाह्याः सिद्धीः प्रतिपाद्याभ्यंतराः प्रतिपादयितुमुपक्रमते नाभिचक्रे कायव्यू
हज्ञानं संयमात्साक्षात्करणादित्येव कदलाकंदवदावृत्यन्तं नाभिचक्ररूपं शरीरमध्यवर्ति यतः शाखापल्लवादि
वच्छिराः पादादिकमूर्ध्वाधः पार्श्वेष्वाविर्भवंति तस्मिन्संयमपूर्वकात्साक्षात्कारात्कायस्थपदार्थव्यूहं वातपित्तत्व
गसृगादिरूपं यथावदवभासते २९। सिध्यंतरमाह कंठकूपे क्षुत्पिपासानिवृत्तिः। संयमात्साक्षात्करणादित्येव कू
पाकारं कंठछिद्रं हृदयपर्यंतं निहितं तस्मिन्संयमादिविशेषतः साक्षात्कारे सति क्षुत्पिपासे न बाधेते ३०। सिध्यंत
रमाह कूर्मनाड्यां स्थैर्यं कुंडलिसर्पवदवस्थितत्वात्कूर्माकारहृदयपुंडराकाख्यनाडीचक्रं तत्र संयमपूर्वकसाक्षात्का

ताश्चित्तस्य स्थैर्यं भवति· यद्वा· कायस्य स्थैर्यं भवति न केनचित्॥ संयमात्साक्षात्करणादित्येव·॥ स्पंदयितुं शक्यत इत्यर्थः

42 ॥३१॥ सिध्यंतरमाह· मूर्द्धज्योतिषि सिद्धदर्शनं॥ संयमात्साक्षात्करणादित्येव· शिरःकपाले ब्रह्मरंध्राख्यं छिद्रं प्रकाशा

धारत्वात् ज्योतिः यथा गृहाभ्यंतरस्थस्य मणेः प्रसरंती प्रभा कुंचिकाविवरप्रदेशे संघटते तथा हृदयस्थः सात्विकः प्रका

शस्तत्र संपिंडितत्वं लभते तत्र संयमपूर्वकात्साक्षात्काराद् द्यावापृथिव्योरंतरालवर्त्तिनः सिद्धा दिव्यपुरुषास्तेषामि

तरप्राण्यदृश्यानां दर्शनं भवति॥३२॥ सर्वज्ञत्वोपायमाह· प्रातिभाद्वा सर्वं· संयमादित्यनुवर्त्तते· निमित्तानपेक्षं मनोमात्र

जन्यमविसंवादिकं झटित्युत्पद्यमानं ज्ञानं प्रतिभा तस्याः संयमपूर्वकः साक्षात्कारः प्रातिभस्तस्माद्विवेकख्यातेः प्रथममुत्पद्य ॥४२॥

मानस्सर्वमेव पूर्वोक्तमतीतानागतादिसिद्धिदर्शनांतमन्यद्वा जिज्ञासितं यो जानाति ३३। संयमस्यमुख्यसिद्ध्युत्काउदानीमा
त्मसाक्षात्काररूपं संयमस्यमुख्यसिद्धिं वक्तुमादौ तत्संयमहेतोश्चित्तसाक्षात्कारस्यकरणं संयममाह हृदये चित्तसंवि
त्: संयमात्साक्षात्करणादित्येव हृदयं शरीरस्य प्रदेशविशेषस्तस्मिन्नधोमुखस्वल्पपुंडरीकाभ्यंतरे संयमात्साक्षा
त्कारपूर्वकाच्चित्तसाक्षात्कारो भवति ३४। चित्ते ज्ञाते तच्चित्ताद्विवेकेनात्मसाक्षात्कारो भवत्यौत्सर्गिकक्रममनुसृत्याह स
त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानं प्रकाशसुखात्मकः प्राधानिकः सत्त्वं
परिणामविशेषो बुद्धितत्त्ववाच्यः पुरुषो भोक्ताधिष्ठातृस्वरूपस्तयोरत्यंतविधर्मिणोरपि प्रत्ययाविशेषः प्रत्ययद्वया

विषेको भोगइत्यर्थः तयोः प्रत्यययोर्मध्ये परार्थात्प्रत्ययाद्विविक्तस्य स्वार्थे पौरुषेये प्रत्यये संयमात्साक्षात्कारपूर्वका
43 द्धेतोः स्वयमेव पूर्णत्वाद्यशेषविशेषोः पुरुषसाक्षात्कारो भवतितादृक्संयमाभावेपीत्यर्थः। बुद्धेः प्रत्ययः शान्ता
धाकारासुखाद्यात्मिका वृत्तिः पुरुषस्य प्रत्ययस्तदवच्छिन्नं चैतन्यं तत्र चैकत्वमात्रे एवैकत्वस्य गोणो भोगः सच चित्त
सानइति सांख्यसूत्रे योगभाष्ये च प्रसिद्धः। अनेन तु सूत्रेण तप्तायःपिंडवद्विविक्तं तदुभयमपि भोगइति लोकव्यव
हारेणोक्तं लोकैर्हि अहं दृष्टा दिग्रहीताहं सुखीत्याद्यभिमानपूर्वकं सुखाद्यनुभवएव भोगइत्युच्यते भोगमध्ये चैतन्येस्य
विवेकव्यक्तयात्र सूत्रेपि भोगो लक्षितः। आत्मतत्वज्ञानार्थिभिरन्तःसंयमस्यैवावश्यापेक्षणादिति ३५। स्वार्थप्रत्य ॥४३॥

यसंयमेनात्मसाक्षात्कारे जाते तच्चिह्नानि वक्ष्यमाणस्य विवेकज्ञानस्य पूर्वरूपाणि प्रतिभादयः सिद्धयो भवंति । तास्वपुरु
षैकाग्र्यपरिपंथित्वेनासंप्रज्ञातयोगे विघ्नभूता इति प्रतिपादयितुमादौ ताः प्रदर्शयति । ततः प्रातिभश्रावणवेदनादर्शास्वा
दवार्त्ता जायंते ततः पुरुषसाक्षात्काराभ्यासादेतानि प्रातिभादिसंज्ञाः षट् सिद्धयः सामर्थ्यविशेषरूपा भवंति । तत्रोपदेशा
दिकं विनापि सूक्ष्मव्यवहितादिषु मनसो यथार्थज्ञानं प्रातिभमित्युच्यते । श्रोत्रस्य तादृशं सामर्थ्यं श्रावणं त्वचस्तादृश
सामर्थ्यं वेदनं चक्षुष आदर्शः रसनाया आस्वादः घ्राणस्य वार्त्तेति । ३६ । एतेषां फलविशेषाणां विषयविभागं वदन्नसं
प्रज्ञातं प्राप्तस्य तत्रोपेक्षणीयतामाह । ते समाधावुपसर्गा व्युत्थाने सिद्धयः । ते प्रतिभादयः समाधौ विघ्नरूपा व्युत्थाने

व्युत्थितचित्तानामेव सिद्धयः पुरुषार्थत्वेनोपादेया न समाहितचित्तानामित्यर्थः ॥३७॥ ज्ञानादिरूपाः संयमसिद्धय उक्ताः सं
55 प्रतिक्रियारूपा अपिताः कतिपयसूत्रैराह् बंधकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ।चंचलस्वभाव
स्यापि मनसो धर्माववशादेव शरीरे बंधो ज्ञानहेतु संयोगस्थैर्यं भवति तस्य बंधकारणस्य कर्मणः शैथिल्यं दृढबंधनाशम
नारूपं तानवं चित्तस्य प्रचारसंवेदनं चानया नाड्या एवं प्रकारेण चित्तं शरीरे प्रविशति निर्गच्छति चेत्येवंरूपं योगेन धर्मा
ज्जायते तत्रस्ताभ्यां हेतुभ्यां योगिनां परशरीरावेशसिद्धिर्भवति यथा स्वशरीराल्लिंगशरीरं निःसार्य परशरीरे प्रवेश्यत इ
त्यर्थः ॥३८॥ योगशास्त्रोक्त संयमविशेषजस्योदानजयस्य सिद्धिमाह् उदानजयाज्जलपंककंटकादिष्वसंग उत्क्रान्तिश्च ॥४४॥

रसाघूर्द्धनयनादूर्ध्वगतिप्रदत्वाच्चोर्द्धसंचारी प्राणस्यावांतरभेद उदान उच्यते तस्य जये संयमविशेषेण स्वायत्ततां यां कृता
यां जलादिषु संचारतोपि तेषु संगो विकारहेतुसंयोगश्शून्यता भवति तथार्चिरादिमार्गेण ब्रह्मलोकगमनाय स्वतन्त्रं प्रभि
त्वा लिंगशरीरस्य बहिर्निःसरणं च स्वेच्छया भवतीत्यर्थः ॥३९॥ सिध्यंतरमाह समानजयात्प्रज्वलनं समं सर्वनाडीषु रसा
नां संचारणात्समानः कोष्ठाग्न्यावरणभूतः प्राणभेदस्तस्य संयमविशेषेणायत्ततायां कृतायां कोष्ठाग्न्यावरणापाकरणा
त्तेनाग्निना शरीरस्य प्रज्वलनं दाहो भवति सततं देहस्यैवेत्यर्थः ॥ राजवृत्तौ तु निरावरणस्याग्नेरूर्ध्वगतत्वेन तत्तेजसा ज्वलन्नि
व योगी प्रतिभातीत्यर्थ इत्युक्तं ॥४०॥ सिध्यंतरमाह श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं श्रोत्रस्याहंकारिकत्वेप्याकाश

अत्रकाहंकारेणाकाशादेशाविशेषरूपेकर्णशष्कुलीछिद्रेएवतस्यजननातयोःसंबंधोदेशदेशिरूपोयस्तस्मिन्कृ
45 तसंयमस्ययोगिनोदिव्यंश्रोत्रंप्रवर्ततेयुगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्दग्रहणसमर्थंभवतीत्यर्थः उपलक्षणंचैतत्त्व
ग्वातयोश्चक्षुस्तेजसोरसनोदकयोर्घ्राणपृथिव्योः संबंधसंयमादिव्यस्पर्शादीनां ४१ सिद्ध्यंतरमाह· कायाकाशयोः सं
बंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं यत्रकायस्तत्रतदवकाशदाय्याकाशोस्तीत्येवंव्याप्तिरूपोयःसंबंधस्तत्र
संयमंविधायलघुनितूलादौचसमापत्तिंतन्मयीभावलक्षणांविधायप्राप्तात्यंतलघुभावोयोगीतंतुजालेनोर्णनाभ
इवादित्यरश्मिभिर्विहरत्यथेष्टमाकाशेनगच्छतीत्यर्थः ४२ सिद्ध्यंतरमाह· बहिरकल्पितावृत्तिर्महाविदेहाततः प्रका।४५।

णावरणक्षयः। शरीराद्बहिर्या मनसः शरीरनैरपेक्ष्येण शरीराहंकारभावं परित्यज्य या वृत्तिः सा महा। हा विदेहाख्या यो
गज्ञास्तेन संयमविशेषजन्यात्तत्त्वप्रकाशावरणस्य सात्विकचित्तसत्वाक चित्तसत्त्वावरकस्य रजस्तमआदेः क्षयः प्र
विलयो भवति यस्मान्निरावरणं योगिनश्चित्तं स्वेच्छया विहरति विजानाति चेत्यर्थः। शरीरप्रविष्टस्यैव मनसो बहिर्व
वहित्तादिषु वृत्तिः कल्पिताख्याता तद्भिन्ना तु कल्पिता महाविदेहाख्येति नं च व्यवस्था॥ ४३॥ प्रतिपादिताः सिद्धयो बाह्या
आभ्यंतराः परिकर्मभूताः समाध्युपयोगिनाश्च संप्रति स्वदर्शनोपयोगि संप्रज्ञातासंप्रज्ञातसिध्युपायभूता ग्रा
ह्यग्रहणग्रहीतृसंयमस्य सिद्धीर्दर्शयन्नादौ ग्राह्यसंयमसिद्धिमाह। स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भू

तजयः पृथिव्यादीनां भूतानां पंचनामपि ये पंचावस्थाविशेषरूपा धर्माः स्थूलत्वादयस्तेषु संयमाद्भूतजयस्तेषां वशीकारः स्वे
46 छानुविधायित्वं भवति योगिन इत्यर्थः। तथाहि भूतानां परिदृश्यमानं विशिष्टाकारवत्स्थूलरूपं स्वपंचैषां यथाक्रमं कार्के
श्यस्नेहौष्ण्यप्रेरणावकाशदानलक्षणं। सूक्ष्मं यथाक्रमं भूतानां कारणभेदेन व्यवस्थितानि गंधादितन्मात्राणि। अ
न्वयिनो गुणाः प्रकाशप्रवृत्तिनिरोधानरूपेण सर्वत्रैवान्वितत्वेनोपलभ्यंते। अर्थवत्त्वं तु भोगापवर्गसामर्थ्यं गुणनिष्ठं
भूतेषु गुणान्वयादागतं। तदेवं भूतेषु पंचसूक्तधर्मलक्षणावस्थाभिन्नेषु प्रत्यवस्थं संयमं कुर्वतो योगिनः स्वसंकल्पा
नुसारीणि भूतानि भवंति वत्सानुसारिण्यो गाव इत्यर्थः ॥४४॥ तस्यैव भूतजयस्य फलमाह। ततोऽणिमादिप्रादुर्भावः ॥४५॥

कायसंपत्तद्धर्मानभिघातश्च॥ अणिमा परमाणुतुल्यता महिमा महत्त्वं विभुत्वमिति यावत् लघिमा लघुत्वं तूलपिडव
त् गरिमा गुरुत्वं मेर्वादिवत् प्राप्तिरंगुल्यग्रेण चंद्रस्पर्शनशक्तिता प्राकाम्यमिच्छानभिघातः सत्यसंकल्पत्वमिति या
वत् ईशित्वं सर्वत्रप्रभविष्णुता वशित्वं सर्वाण्येव भूतानि तदुक्तमनुगामित्वान्नातिक्रामंति तत्राणिमाद्याः प्रास्यंताः
समाध्युपयोगिने स्थूलजयात्त्वं तिर्यथा परमाणुत्वं प्राप्नोवज्रादीनप्यंतः प्रविशतीत्येवं स्वरूपजयात्प्राकाम्यं भवंति प्रा
प्स्यादित्रयं तु हेतुसंयमादिति विभागः। कायसंपदुत्तरसूत्रे वक्ष्यमाणा तस्य कायस्य भूतधर्मैः काठिन्यादिभिरनभिघा
तश्च भूतजयात्सिध्यति येन शिलां न विशति शिलातो छाद्यश्चैनेन बाधं न इत्यर्थः॥ ४५॥ प्रसिद्धत्वात्सिद्धिद्वयमव्याख्या

पकायसंपदं व्याचष्टे रूपलावण्यवज्रसंहननत्वानि कायसंपत् वज्रदृढः संघातोयस्येति वज्रसंहननः शेषं स्पष्टं ।४६।
ग्राह्यसंयमस्य सिद्धयुक्ताः ग्रहणसंयमस्य सिद्धिमाह ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः। ग्रहणमिं
47 द्रियाणां विषयाभिमुखी वृत्तिः। स्वरूपं तु सामान्येन प्रकाशकत्वं अस्मिताहंकारानुगमः अन्वयार्थवत्वे च पूर्ववत् एते
षामिंद्रियाणां मवस्थापंचके पूर्ववत्संयमं कुर्वतो योगिन इंद्रियजयो भवति एतत्संकल्पानुविधेयानींद्रियाणि भवंतिन
पुनर्विषयस्त्रोतमात्रादयमिंद्रियैरपकृष्यतइत्यर्थः।४७। तस्य फलमाह तनो मनोजवित्वं विकरणभावः प्रधानजयश्च
मनोवच्छीघ्रतरा देहगतिर्मनोजवित्वं स्थूलदेहनिरपेक्षाणामिंद्रियाणां सर्वत्र वृत्तिलाभो विकरणभावः प्रधानस्य।४७।

प्रकृतेः स्वेच्छया परिणामनं एताः सिद्धयो जितेंद्रियस्य भवंतीत्यर्थः। ता एताः शास्त्रे सिद्धयो मधुमत्य इति मधुप्रतीका इति
चोच्यंते यतो मधुवत्सर्वैकमपि स्वदंते योगिनां ४८ ग्राह्यग्रहणयोः सिद्धिरुक्ता ग्रहीतृसंयमस्य सिद्धिमाह द्वाभ्यां। सत्त्वपु
रुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च। मात्रशब्देन संयमरूपताख्याते लभ्यते तथा च पूर्वोक्तसंयमे
न निर्धूतरजस्तमोमलस्यांतःकरणस्य जयेवशीकारसंज्ञायामपरस्यां विरक्तौ स्थितस्य योगिनः सत्त्वपुरुषयोर्बुद्धिबोधयो
र्योन्यताख्यातिपरस्परविक्तविक्तताबुद्धिः सा ज्ञायते तन्मात्रस्य तदाकृतेर्दृढसंयततास्थायाः फलं सर्वभावाधिष्ठातृत्वं प्रकृ
तिपुरुषविकृतीनां स्वैरयितृत्वं सर्वेषां भूतभवद्भाविनां च ज्ञातृत्वं च सिध्यति एषा च विशोका नाम सिद्धिः शास्त्रे परिभाषि

ता॥४९॥ सर्वसिद्धिमूर्द्धन्यं विवेकख्यातेः परवैराग्यद्वारकं सिध्यंतरमाह । तद्वैराग्यादपि दोषबीजक्षये कैवल्यं । अपिशब्दः
48 कैवल्यमित्यनेनान्वयी । तस्यां विशोकायां सिद्धौ वैराग्यतद्धेतौ विवेकख्यातावपि वैराग्यं परं भवति तनश्चासंप्रज्ञातयोग
निष्पत्त्या दुःखदोषस्य बीजानामखिलवासनाकर्मणां क्षये सर्वात्मना तिरोधाने पुरुषस्यैकैवल्यमात्यंतिकः प्रकृतिवि
लयो भवतीत्यर्थः । यस्य चासंप्रज्ञातानिष्पत्त्या प्रारब्धं कर्म नोच्छिद्यते तस्यापि प्रारब्धसमाप्त्यनंतरमुत्सद्यमानो मोक्ष
एव यथोक्तसंयमसिद्धिरिति ।५०। उक्तस्यासंसंयमिनः कैवल्याख्यसिध्यर्थं न केवलं सार्वज्ञादिसिद्धिषु वैराग्यमेवापे
क्ष्यतेऽपि तु अन्यदपीत्याह । स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात् । स्थानिनः स्वर्गादिलोकाधिकारिणो दे ॥५१॥

माहेन्द्रादयस्तेषां स्वस्वलोकं प्रतिनयनाय योगिनमुपनिमंत्रणे दिव्यस्त्रीरसायनाद्युपकल्पने सतितेनैन तत्र स्मयः
कर्त्तव्यः स्मयो वा अन्यथा पुनः संसारप्रसंगादिति ५१ सार्वज्ञेपि वैराग्याभ्यासमुक्तं यद्यपि तत्र रागानगच्छति वासना
प्राबल्यादिदोषात्तदा तद्रागनिवृत्तये पूर्ववत्सर्वज्ञतासाधकं संयमांतरं कर्तव्यमित्याह क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञा
नं क्षणः सर्वान्त्यः कालावयवो यस्यावयवाः प्रविभक्तुं न शक्यंते तथाविधानां क्षणानां यः क्रमः पौर्वापर्येण परिणामस्तत्र
संयमात्प्रागुक्तं विवेकजं ज्ञानमुत्पद्यते सर्ववस्तूनां मध्ये विशेषैर्विविच्य साक्षात्कारो भवतीत्यर्थः प्रतिक्षणं सर्व
वस्तूनां परिणामावश्यंभावात्क्षणेषु तत्क्रमे च साक्षात्कृतेषु सत्सु सर्ववस्तूनामपि परिणामतत्क्रमयोर्ज्ञानात्सर्वव

स्तूनांविवेकजंज्ञानंभवतीति·५२।विवेकजज्ञानस्यैकमुदाहरणमाह·जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः
49 प्रतिपत्तिः।पदार्थानांभेदहेतवोजातिलक्षणदेशाभवन्ति·तत्रक्वचिद्भेदहेतुर्जातिर्यथागौरयंमहिषोयमिति·जा
त्यातुल्ययोर्भेदलक्षणंभेदहेतुः।इयंकर्बुरेयमरुणेति·जात्यालक्षणेनचतुल्ययोर्देशोभेदहेतुः।यथातुल्यप्रमाणयो
रामलकयोर्भिन्नदेशस्थितयोः।यत्रपुनर्भेदोनधारयितुंशक्यतेयथापूर्वदेशस्थितमामलकंकविषयान्तरासक्तस्य
कस्यचिदुत्तरदेशेकेनापिनीयतेउत्तरदेशस्थंचतत्समानमामलकान्तरंपूर्वदेशेनीयतेतदातयोरामलकयोःसजाती
यत्वात्सलक्षणत्वात्कालभेदेनसमानदेशस्थत्वाच्चेदंमत्पूर्वदेशस्थमिदंमदुत्तरदेशस्थमिति·तत्रतयोरामलकयो ॥४९॥

स्तत्क्रमसंबंधलक्षणानां संयमेन साक्षात्करणान्देशैर्वामलकयोर्भेदप्रतिपत्तिर्योगिनो भवति· एतच्च क्षणसंयमाद्वि
वेकप्रतिपत्तेरुदाहरणं· क्षणक्रमसंयमात्तद्विवेकप्रतिपत्तेस्तु यथा द्वित्रिक्षणमात्रेणान्यस्थकं निस्थयोन्यस्थकं निस्था विवेक
ज्ञानं क्षणक्रमसाक्षात्कारं विना न संभवतीत्यतः क्षणसंयमस्तत्कारणमिति· ५३॥ विवेकजज्ञानस्यैकमुदाहरणं प्रदर्शि
तं· इदानीं सहेतुकं विवेकज्ञानस्योपयोगमाह· तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं इति शास्त्रे हेत्वर्थे·
यतो विवेकजं ज्ञानं सर्वविषयादिरूपमतः सर्वत्र शुद्धवैराग्येण दोषदर्शनादिना च द्वारेण संसारतारकं भवति· तत्र सर्ववि
षयं सर्वाणि महदादीनि विषयो स्येति· सर्वथाविषयत्वं च सर्वाभिरवस्थाभिः स्थूलस्वरूपसूक्ष्मादिभेदेनतैस्तैश्च परिणा

मैः सर्वेण प्रकारेणावस्थितानि तत्त्वानि विषयो यस्येति। अक्रमत्वं च युगपदेवैककरतलामलकवत्सर्वसमूहालंबनत्वं। ४९। एव
50 मन्ति विस्तरेण विवेकख्यातिपरमावधिकं संस्कारसाद्विभूतिफला संयममनुपन्यस्य तत्र विवेकख्यातेः परमावधित्वमस्तु मा
वा सत्त्वपुरुषान्यतासाक्षात्कारमात्रं मुक्त्येवक्तुमुपन्नस्याह। सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यं। बुद्धिसत्त्वस्य पुरुषेण सहास्मि
मानावस्यमाणरूपा सुद्धिर्भवति यदा तदैव मोक्षो भवति न तत्रान्यदपेक्ष्यमस्तीत्यर्थः। निरभिमानत्वं पुरुषस्यात्र शुद्धि
र्भोग्यत्वं तोक्ता। तथा च यथा साक्षी निरभिमान एवं चेच्चित्तं निरभिमानं भवति विवेकनिष्ठया तदा प्राप्तसिद्धेरप्राप्तसिद्धेर्वा
वश्यं मोक्षो भवतीनैश्वर्याद्यपेक्षेति। ननु स्वांगे योगेऽभ्यस्यमाने सिद्धिरवश्यं भविष्यत्येवेति चेन्न। सिद्धेर्वैराग्ये सिद्धि ॥५०॥

प्रतिबंधकपापेन सति सिध्यनुत्पादः संभवादिति॥५४॥ ॥पातंजलानां सूत्राणामुदयंकरदर्शिते। वृसर्थसंग्रहे पादस्तृतीयः
संगतोगतः॥ नतुस्थ्यनिमितौ तस्यैके पेरमृअवह्नुनिषु सकलावर्जनेन तस्मात्समर्थो जल्पिरे षनः॥ इतिविभूतिपादस्तृतीयः स
माप्तः॥ ॥एवं प्रथमपादेन योग उक्तो द्वितीयेन तत्साधनान्युक्तानि तृतीयेन श्रद्धोत्पादनार्थं विभूतयो व्याख्याताः। इदानीं वि
प्रतिपत्ति समुत्थभ्रांतिनिराकरणेन युक्त्या कैवल्यस्वरूपावस्थापनाय कैवल्यपादश्चतुर्थ आरभ्यते। तत्रादौ कैवल्ययोग्यं
चित्तं निर्द्धारयितुं पूर्वोक्तसिद्धीनां हेतुभेदात्पंचविधत्वमाहः जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः॥ जन्मनापक्ष्यादीना
माकाशगमनादिसिद्धिः कपिलादीनां च ज्ञानप्रकर्षादिरूपासां सिद्धिकोत्युच्यते। इद्रिजिमाद्धिन्नभिन्नावयवानांवानरा

णां पुनरवयवविरोहणसिद्धिरौषधिसेवनात् मन्त्रादिक्ष्वाकुप्रभृतीनां स्वर्गाद्याकर्षणसिद्धिर्नेपाग् तपसा विश्वामित्रादीनां
51 ब्राह्मण्याद्यवाप्तिसिद्धिः ।९ एताश्चतस्रः सिद्धयः पूर्वजन्माभ्यस्तयोगजा एव जन्मादिना निमित्तेन व्यज्यंते अतश्च योगाभ्यासे वि
श्वासतः प्रवृत्तिः इह जन्मनि सिद्धेरसिद्धावपि जन्मांतरे तदवश्यंभावात् समाधिजास्तु पूर्वपादे व्याख्याता ।१। तस्मात्समाधिसि
द्धाविवान्यासां सिद्धीनां जन्मांतराभ्यस्तः समाधिरेव कारणं मंत्रादीनि तु निमित्तमात्राणि ।१। ननु नंदीश्वरादीनां जात्यादिपरि
णामस्तस्मिन्नेव जन्मनि दृश्यते तत्कथं जन्मांतराभ्यस्तसमाधिस्तत्र कारणमत आह॥ जात्यंतरपरिणामः प्रकृत्यापूरात्॥ यो
यमेव तस्मिन्नेव जन्मनि नंदीश्वरादीनां मानुषदेहनिरोधानेन दिव्यदेहपरिणामः स प्रकृत्यापूरात् प्रकृतेर्दिव्यदेहारंभकावयव ।।५१।।

रूपायास्तिरोहितभावंपरित्यज्यकार्यारंभवद्भावआपूरस्तस्मात्॥२॥ननुप्रकृत्यापूरोधर्मादिनिमित्तमपेक्षतेनवा।नचेत्सर्व
त्रप्रवृत्त्यापूरापत्तिः अपेक्षतेचेत्स्वकृतिस्वातंत्र्यासिद्धांतभंगः॥३॥ष्टापत्तावीश्वरसंकल्पकृतोविनासर्गादौप्रवृत्तिप्रवर्तेतरनु
पपत्त्याईश्वरस्यैवापत्त्यानैर्घृण्यप्रसंगस्तत्राह॥ निमित्तमप्रयोजकंप्रकृतीनांवरणभेदस्तुततःक्षेत्रिकवत्॥ धर्मादिरूपंनिमि
त्तकारणंप्रकृतीनांमहदादिविकाराणांप्रयोजकंप्रवर्तकंनभवतिस्वतन्त्रप्रवृत्तिस्वाभाव्यात्किंतुततोनिमित्तकारणाद्वर
णभंगंवरणस्यावरकस्यप्रतिबंधकस्याधर्मादेर्निवृत्तिमात्रंभवतिधर्मेणाधर्मनिरासेप्रकृतयःस्वयमेवदेवादिपरिणामेप्र
वर्त्तते॥ अत्रदृष्टांतः।क्षेत्रिकवत्॥ यथाकृषीवलोजलस्योन्नततादेरावरकस्यभेदनमात्रंकरोतिततोजलंस्वयमेवकेदारांतरे

52

प्रवर्त्तंते तद्वदित्यर्थः॥ अचेतनं चेतनाधिष्ठितमेव प्रवर्त्तत इति नियमस्यास्माभिरंगीकाराद्वैषम्यनैर्घृण्ये ईश्वरस्य न प्रसज्ये
ते इति भावः॥३॥ यदा साक्षात्कृततत्त्वस्य योगिनो युगपत्कर्मफलोपभोगायात्मीयनिरतिशयविभूत्यनुभावाद्युगपदनेक
शरीरनिर्मित्सा जायते तदा कुतस्तानि चित्तानि भवंतीत्यत आह॰ निर्माणचित्तान्यस्मितामात्रात्॰ योगप्रभावान्निर्मीयं
ते इति निर्माणानि चित्तानि मनांसि योगिसंकल्पाधीनकायप्रकृत्यापूरात् कायवन्मनःप्रकृतेरहंकारस्यापूरादग्नेर्विस्फुलिं
गा इव युगपज्जायंत इत्यर्थः॥४॥ ननु बहूनां चित्तानां भिन्नाभिप्रायत्वान्नैककार्यकर्तृत्वं योगिनः प्रसज्यत इत्यत आह॰ प्रवृ
त्तिभेदे प्रयोजकं चित्तमेकमनेकेषां॰ तेषामनेकेषां निर्माणचित्तानां प्रवृत्तिभेदे प्रतिनियतव्यापारे प्रयोजकं निर्मातृचित्त॥५२॥

मेवभवतिनिर्मातृचित्तसंकल्पेनैवतेषामखिलव्यापाराइत्यर्थः।५।तदेवमुक्तेषुसिद्धचित्तेषुमध्येमोक्षयोग्यंचित्तमव
धारयतितत्रध्यानजमनाशयं तेषुसिद्धचित्तेषुमध्येध्यानेनसमाधिनासंस्कृतमेवचित्तमनाशयंनिर्वासनंभवतिनमं
त्रादिसंस्कृतमित्यर्थः।समाधिनैवयोगद्वयद्वारानिखिलवासनोन्मूलनसंभवादिति।६।इतश्चध्यानजचित्तमेवमो
क्षयोग्यमित्याह।कर्माशुक्लाकृष्णंयोगिनस्त्रिविधमितरेषां।शुक्लंकर्मयागादिस्वरूपंशुभफलदंकृष्णमशुभफलप्रदं
ब्रह्महत्यादितदुभयसंकीर्णंशुक्लकृष्णं।तत्रशुक्लंकर्मविचक्षणानांदानतपःस्वाध्यायादिमतांकृष्णंनारकाणामसु
रस्वभावानामितरेषांशुक्लकृष्णंयथासंभवंजन्मादिसिद्धियुक्तानामपियोगरहितानां।योगिनांपुनःसन्न्यासवतामे

वंविधकर्मविपरीतंयत्फलत्यागानुसंधानेनैवानुष्ठानात्सपरिणामेनकिंचित्फलमारभंते।ऽननुध्यानजानाद्यपिचित्त
57 वर्तांयोगिनामेवमोक्षदृत्तिकुतःअन्यचयोगरहितानांकर्मैवोक्तलक्षणंतत्त्रिविधंस्यात्·नस्यात्·तेषामपिभोगवा
सनानभिव्यक्तौकदाचित्स्यादुर्निवारत्वादतआह·ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां·एतस्मात्त्रिवि
धात्कर्मणोभोगवासनामभिव्यक्तिर्भवतिततश्चसतिकर्मणिसतिवासनानभिव्यक्तौभावोनघटतेनन्वेवंमानुष्यप्रा
पककर्मणापिप[illegible]ादिभोगवासनाभिव्यक्तौतृणपर्णादिभोजनादौप्रवृत्त्यापत्तिस्तत्राह·तद्विपाकानुगुणानामेवेति·
स्वविपाकहेतुभूतवासनानामेवाभिव्यक्तिर्भवतिनसर्वासामित्यर्थः।८।ननुयस्यकर्मणोविपाकानुगुण[redacted]वासना॥५३॥

बहुजन्मादिव्यवहितानांतस्यतदभिव्यंजकत्वंनघटतेसन्निहितवासनांपरित्यज्यव्यवहितवासनाभिव्यक्तेरनौचित्यादतआहः
जातिदेशकालव्यवहितानामप्यानंतर्यंस्मृतिसंस्कारयोरेकरूपत्वात्।जातिर्जन्मकोषवधिर्देशोवर्षद्वीपादिलक्षणःका
लश्चयुगकल्पादिस्वरूपस्तैर्व्यवहितानामपिवासनानामानंतर्यंअव्यवहितवत्कार्यकारित्वंकल्पते।कस्मात्।स्मृतिसंस्का
रयोरेकरूपत्वात्।नहिजातमात्रस्यस्तनपानादिष्टसाधनतादिस्मृतिस्तत्समानाकारवासनांविनोपपद्यते।तथाह्यनुष्ठीय
मानात्कर्मणश्चित्तसत्त्वेवासनारूपःसंस्कारःसमुत्पद्यतेसचस्तनपानादीनांतत्कर्मफलानामंकुरीभावःकर्मणांवासूक्ष्म
शक्तिरूपेणावस्थानंसंस्काराच्चस्मृतिःस्मृतेश्चततस्तत्कर्मफलोपभोगःततस्तदुत्थसुखदुःखानुभवःतदनुभवाच्चपुनरपिसं

स्कारस्मृत्यास्त्यः॥ एवंचस्मृतिसंस्कारादयोयस्यभिन्नास्तस्यानंतर्याभावेदुर्लभःकार्यकारणभावः॥ अस्माकंतुयदानुभवएव
संस्कारात्मतापरिणमतेसंस्कारश्चस्मृत्यात्मनातदैकस्यैवचित्तस्यानुसंधातृत्वेनस्थितत्वात्कार्यकारणभावोनदुर्घटः॥९॥न
न्वेवंसकलजन्मार्थवासनांगीकारेऽनवस्थापत्तिपरिस्याइंकाप्रामाणिकत्वेनाभ्युपगम्यापाकरोति॥ तासामनादित्वंचाशिषो
नित्यत्वात्॥ नकेवलंतासांवासनानामानंतर्यंविंत्वनादित्वमपीतिचार्थः॥ कुतः॥ आशिषोनित्यत्वात्॥ येयमाशीर्महामोहरूपा
सदैवसुखसाधनानिमेभूयासुर्माकदाचनवियोगस्तैर्मेभूदितियःसंकल्पविशेषोवासनानांकारणंतस्यनित्यत्वादनादि
त्वमित्यर्थः॥ एतदुक्तंभवतिकारणस्यसन्निहितत्वादनुभवसंस्कारादीनांकार्याणांप्रवृत्तिःकेनवार्यते॥ अनुभवसंस्काराद्यनुवि॥५४॥

ङ्कं च संकोचविकाशधर्मि चित्तं तत्तदभिव्यंजकतत्तद्देहादिलाभात्तत्स्वरूपतया परिणमत इत्यर्थः॥१०॥ यद्यानंत्यं वासना-
नां तद्धाऽशक्यसमुच्छेदास्ताः कथं हातुं शक्या अत आह हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामभावे तदभावः। नैताः पु-
रुषवदनादयः किंतु प्रवाहानादयः। अतः कारणोच्छेदात्तदुच्छेदसंभवः। तथाहि। अखिलवासनानामनंतरो विषयोपभो-
गो हेतुस्तस्य धर्माधर्मौ तयोरपि परनिग्रहानुग्रहादिना रागद्वेषौ तयोरप्यविद्याऽस्वात्मनोऽहं ममेदमिष्टमनिष्टं वेति भ्रमस्तस्या
ऽपि पूर्वपूर्वभ्रमसंस्कारलक्षणाऽविद्येति साक्षात्पारंपर्येण च हेतुः। तस्यापि पूर्वपूर्वोक्तादिवासनेति संसारचक्रमावर्त्तत इ-
त्यनंतः। फलं देहादि स्मृत्यादि च। आश्रयो बुद्धितत्त्वं चित्ताख्यं। आलंबनं यदेवोपभोगस्यात्तदेवाच्छावन्यतमविषयस्य

रूपं· अनंतैर्हेतुफलाश्रयालंबनैरनंतानामपि वासनानां गृहीतत्वात्तदभावात्तेषामभावेऽत्यंतोच्छेदे विदेहमुक्तिसम
55 ये तदभावस्तदविनाभूतानां वासनानामत्यंतोच्छेदो भवतीत्यर्थः। तथा च वासनानामनंत्येऽपि मोक्षो नानुपपन्न इति भा
वः॥११॥ ननु वासनारूपाणां संस्काराणां तत्फलानां च देहादीनामुत्पत्तेः कार्यकारणभावो दुर्घटः। एकदेशस्थितेन हि का
रणेन तत्रैव कार्यमुत्पादनीयं· देशश्च चित्तरूपो विवक्षितः। न चासौ विद्यते तस्य प्रतिक्षणं ध्वस्तोपलब्धेरत आह· अ
तीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणां· इह सतां भावानामुत्पत्तिर्न युक्तिमती· तेषां सत्त्वसंबंधायोगात्· न हि शश
विषाणादीनां क्वचिदपि सत्त्वसंबंधो दृष्टः। सतामपि विरोधान्न भावसंबंधोऽस्ति यत्त्वस्वरूपलब्धसत्ताकं तत्कथं निरु ॥५७॥

पारव्यातां भजेत · यदाह भगवान् · नासतो विधते भावो नाभावो विधते सत इति · तस्मात् सतां नाशासंभवाद् असतां चोत्पत्तेरसंभवात् का
मः संकल्पो विचिकित्सेत्यादिश्रुतिदर्शितैः कामादिरूपैर्धर्मैः परिणममानश्चित्तरूपो धर्मी सदैकरूप एवावतिष्ठते · ननु कामादयः
प्रतिक्षणमुत्पादविनाशशालिनश्चित्तं उक्तदोषात् · धर्मास्तु तेऽध्वभेदेन व्यवस्थितास्तस्मिन्नध्वनि न स्वरूपं त्यजन्ति व
र्तमानेऽध्वनि व्यवस्थिताः केवलं भोग्यतां भजन्ते तस्मादपवर्गपर्यन्तमेकमेव चित्तं धर्मितया निर्होतुं न पार्यते ·१२· त एते धर्मधर्मि
णः किंस्वरूपा इत्यत आह · ते व्यक्तसूक्ष्मा गुणात्मानः · ते कार्यरूपेण परिणममानाः कामादयः कारणरूपेण परिणामि चित्तं ध
र्मि उभयेऽपि व्यक्ता वा भवन्तु अनभिव्यक्ता वा सर्वे एव सर्वदैव गुणात्मानस्तत्त्वतः सत्त्वादिगुणत्रयस्वरूपा भवन्ति · यतः सुखदुःख

56

मोहस्वरूपेणगुणत्रयेणसर्वासांबाह्याभ्यन्तरभेदभिन्नानामभिव्यक्तीनामन्वयोदृश्यते॰यच्चयदन्वयितत्तत्परिणामरूपंदृष्टं
यथाघटाद्योमृदन्वितामृत्परिणामरूपादृष्टाः।तथाचश्रुतिः।वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति॰१३॥ननु
यद्येतेत्रयोगुणाःपरिणामिनस्तत्कथंतत्परिणामएकोधर्मीस्यात्परिणामिभेदस्यपरिणामभेदप्रसञ्जकत्वात्नहिमृत्त
न्त्वादीनांपरिणामिनामेकःपरिणामोदृष्टोऽतआहपरिणामैकत्वाद्वस्तुतत्त्वंबहूनामप्यङ्गाङ्गिभावेनवर्तमानानामेकः
परिणामोदृष्टः।रुक्मायांनिक्षिप्तानांगवाश्वादीनांलवणपरिणामवत्महदादीनांत्वङ्गाङ्गिभावाभावान्नपरिणामैकंगुणा
नांतुपरिणामैक्यमङ्गाङ्गिभावात्यथासत्त्वस्याङ्गित्वेनगुणत्रयादेकःस्थितिरूपःपरिणामस्तथारजसोऽङ्गित्वेनकामादिरूपः॥१४॥

परिणामस्तत्र सांगित्वेनैकश्चैको धर्मरूपः परिणाम इति यथा पृथ्व्यां स्थैर्यं· एकस्माद्बहवः परिणामाः कथमुपपद्यन्त इति चेदेकैकस्य गु
णत्रयात्मकत्वेनानेकत्वात्केवलं तत्परिणामावस्थायामंगांगिभावभेदस्य कल्पनात्·१४॥ ननु क्षणिकविज्ञानात्मकचि
त्तातिरिक्तं वस्तु नास्त्येव यत्प्रमेयं तद्विज्ञानाभिन्नं विज्ञानवत्· प्रमेया घटादयस्तत्कस्यैकत्वनानात्वचिंता· चित्तमेव स्वप्नादिस
मनंतरप्रत्ययात्मकवासनावैचित्र्यं द्व्यगुणात्मना भाति· अन्यथा स्वप्नदृष्टरथादीनामप्याभासमात्रद्बाह्यत्वं न स्यादिति
वदंतं बौद्धं प्रत्याह· वस्तुसाम्ये पि चित्तभेदात्तयोर्विविक्तः पंथाः॥ तयोरिति विज्ञानात्मकस्य चित्तस्य वस्तुनो घटादेश्च विविक्तो
विभक्तो भिन्नः पंथा मार्गः स्वरूपमिति यावत्· कुतः। वस्तुसाम्येपि चित्तभेदात्· समाने वस्तुन्युपलभ्यमाने नानाप्रमातॄणां चि

57

तस्य भेदः सुखदुःखमोहरूपतया समुपलभ्यते· तथा ह्येकस्यां रूपलावण्यवत्यां योषित्युपलभ्यमानायां सरागस्य सुखमुत्पद्य

ते सपत्न्या द्वेषः परिव्राजकादेरुपेक्षेत्येवमेकस्मिन्वस्तुनि नानाविधाश्चित्तोदयो दृष्टः सर्वेषां च यात्वया दृष्टा सा मयापि दृष्टे

त्यबाधितप्रत्यभिज्ञानादेकं वस्तु यच्चैकं तदनेकेभ्यो भिन्नं यथा नीलरूपश्चित्ताकारः पीतरूपाच्चित्ताकारात्· एकं च योषिद्रूपं व

स्तु स्वगोचरानेकचित्ताकारेभ्यो भिन्नं· यत्तु प्रमेये विज्ञानाभेदसाधकमनुमानमुपन्यस्तं तन्न· तथात्वे सति विषयविषयिभा

वविरोधप्रसंगाद्ग्राह्यार्थाभावे विज्ञानानां नीलपीताद्याकारत्वायोगाच्च· न च समनंतरप्रत्ययात्मकवासनानां तत्र हेतुरिति

वाच्यं· नष्टस्याहेतुत्वात्· तस्मादस्ति विज्ञानातिरिक्तं वस्तु· स्वप्नदृष्टरथादेस्तु प्रतिभासमात्रशरीरा एव ज्ञायतस्त्वस्य वासनानां ॥५७॥

तत्रहेतुत्वकल्पनात् एतेन तत्तत्समानरूपाणां तत्तद्विज्ञानाकारवस्तुनोभिन्नभिन्नत्वमनेकदृष्टसमानाकारस्वप्र
गतवस्तुबद्धिरपास्ता· सोयमिति प्रत्यभिज्ञायावस्त्वैक्यस्य प्रागेवोपपादितत्वात्· नचानेकदृष्टसमानाकारस्व
प्नेपितत्तुल्यमितिवाच्यं तस्य सजातीयविषयत्वेनगौणत्वात्· तथास्यैकेनस्वप्नदृष्टविषयेऽपरं प्रतिकथिते स आह·
पश्चायादृष्टस्तत्समानोमयापिदृष्टइति· जाग्रदवस्थायांयासुखजनकत्वेन कामुकदृष्टायोषित्तामेवाहं दुःखज
नकत्वेन पश्यामीति सपत्न्यनुभवोनतु तत्सजातीयाभिलापीति विशेषाद्वस्त्वैक्यसिद्धिरिति संक्षेपः॥१३५॥ एवंवि
ज्ञानवादिनिनिराकृते दृष्टिसृष्टिवादी प्रत्यवतिष्ठते· असत्कृतहेतोर्विज्ञानव्यतिरिक्तस्तद्विषयः सत्तुच्छत्वाद्विज्ञा

नयान्योनाज्ञातोस्तीतियावद्विज्ञानमवतिष्ठते· किं तस्योत्पादकमिति चेत्क्वाह न विज्ञानरूपं चित्तमेव तस्य चामेकप्र
58 माणं चित्ततंत्रत्वेऽप्युक्तदोषादेकैव प्रमाणं चित्ततंत्रत्वं· नचैवमेकप्रमाणं चित्तस्यापि क्षणिकत्वाभ्युपगमाद्धस्तत्वेनेक
त्वे प्रत्यभिज्ञाविरोध इतिवाच्यं मृगमदवासनाया वसनइव पूर्वपूर्वविज्ञानगतायाः सोयमित्यनादिवासनाया उत्तरो
त्तरविज्ञानजन्यविषयेष्वुपसंक्रमादिति· अत्रोत्तरमाह· नचैकचित्ततंत्रं वस्तु तदप्रमाणकं तदा किं स्यात्· एकस्मिन्व
स्तुनि प्रयुक्तानेकचित्ततंत्रतानिरासे समुच्चयार्थश्चकारः। यद्येकचित्तस्यैकविज्ञानस्य तंत्रं तदधीनं वस्तु कार्यं
द्रव्यपदार्थस्तदा तत्प्रमाणकं तच्चित्तसिद्धं मतः किं स्यात्· वस्तुनाशाकल्पने प्रमाणाभावाच्चित्तविज्ञानाशोपिस्व ॥५८॥

रूपेणैवतिष्ठेत्·नतन्नाशादिकं किमपिस्यादित्यर्थः॥१६॥नन्वेवंचित्ततदर्थयोर्भेदेसत्यपिकदाचिदेवचित्तेनार्थोगृह्य
तेइत्यत्रकिंनियामकमतआह·तदुपरागापेक्षत्वाच्चित्तस्यवस्तुज्ञाताज्ञातं·चित्तस्यकालभेदेनवस्तुज्ञातमज्ञातंचभव
ति·अर्थाकारताख्योपरागरूपवृत्तिज्ञानसापेक्षत्वादर्थज्ञातत्वाज्ञातत्वयोरित्यर्थः।नचसन्निकर्षएवोपरागशब्दा
र्थः·कथंतेस्यनइतिवाच्यं·सन्निकृष्टेप्यर्थेसत्कमत्वादिदोषेणातदनवधारणात्·१७॥चित्तस्यपरिणामित्वंतदर्थभेदं
चपरीक्ष्यचित्तपुरुषयोरविभेदःसंप्रतिपरिस्पन्दे·सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोःपुरुषस्यापरिणामात्·चित्तवृ
त्तिविषयाणामस्तुतःसंज्ञायान्यथानुपपत्त्याज्ञाताज्ञातत्वंचित्तस्यचपरिणामित्वं·चित्तवृत्तीनांतुसदाज्ञातत्वमेवन

कदाचिदज्ञातता । चैत्रोयं न वेत्त्यादिवस्तुसंशयवच्चैत्रमहं जानामि न वेत्यादिज्ञानाकारवृत्तिविषयकसंशयाभा
वात् । अत्र हेतुः । तत्प्रभोर्वृत्त्युपभोक्तुरर्थाकारवृत्तिगतचित्प्रतिबिंबवत्तो वृत्तिसाक्षिण इति यावत् । एतादृशस्य
पुरुषस्यापरिणामात् वृत्त्याकारत्वाभावात् । नहि वृत्तीनां विषयाकारताख्यो परागवत्पुरुषस्य वृत्तिप्रतिबिंबो नाम
वृत्त्याकारत्वमपि तु संबंधमात्रं प्रतिबिंबशब्दार्थः । पुरुषस्य परिणामांगीकारे च वृत्तिगतसंशयापत्तिरुक्तैव अत ए
व द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्य इति सूत्रेऽनुरूपातः सर्वथा वृत्त्याकारत्वव्यावृत्तये इति व्याख्यातं प्राक् । स
च संबंधोऽतिरिक्त एव । चित्तस्य सात्विकत्वात्परिणामवृत्तीनां नैर्मल्येपि निर्मलतरस्य चैतन्यस्य तत्र प्रति ।५९॥

बिंबायोगात्·व्यापकत्वाच्च·अनिर्मलस्यपरिच्छिन्नस्यचमुखस्यनिर्मलेदर्पणादौप्रतिबिंबोहिदृष्टइत्यर्वाचीनाःजलो
दधिभ्योनिर्मलतरस्यादित्यजलादेर्व्यापकस्याव्याकाशस्यदर्पणादौचप्रतिबिंबदर्शनादुक्तहेतोरनैकान्तिकत्वाल्लो =
किकएवप्रतिबिंबःसंबंधोनातिरिक्तइतितुराजमार्गः।३८।ननुचितमेवस्यप्रकाशंस्वस्वार्थयोर्भासकमस्तुकिंतद
प्रमोक्त्रासाक्षिणोस्यतआह·नतत्स्वभासंदृश्यत्वात्·रूपीघटइतिवज्ज्ञानगम्यहंसुख्यहंदुःखोहंशांतमेतद्दृश्यमि
त्यादिरूपतयादृश्यत्वात्दृश्यत्वेनानुभवाच्चितंस्वभासंस्वप्रकाशंनभवतीत्यर्थः।अयंभावः।किमिदंस्वप्रका
शत्वं·ज्ञातावत्स्वाभिन्नप्रकाशक्रियाकर्मत्वं·क्रियाकर्मणोरैक्यायोगात्·नहिगमनंगम्यतेकिंतुग्रामः।नापिपुर

60

पवञ्जित स्वस्वप्रकाशाविषयत्वरूपं तत् । ज्ञातं मे हृदयं बुद्धं मे हृदयमित्याद्यनुभवविषयत्वात्तदतोऽस्य स्वात्मा
तिरिक्तद्रष्टृत्वं चित्तमिति सिद्धं । १९ । हेत्वन्तरेण स्वप्रकाशत्वाभावं साधयति । एकसमये चोभयानवधारणं । चोहे
तो । न तत्स्वभासमित्यनुवर्तते । यत एकसमये उभयानवधारणं मनस्तस्मिन्न तत्स्वभासं भवति । यदा वृत्तिरूपस्य घट
ज्ञानदा त्मानं ग्रहीतुं शक्नोति । न चोत्पद्य द्वितीयक्षणे वृत्तिः स्वं वृत्तान्तं गृह्णीयादिति वाच्यं । क्षणिकबुद्धिकर्मणां वि
रम्यव्यापाराभावेन द्विरर्थग्राहकत्वासंभवात् । २० । ननु तथापि वृत्त्यन्तरैर्ग्राह्या स्वयं संतु तत्राह । चित्तान्तरदृश्या
हे बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च । यदि वृत्तिश्चित्तान्तरेण वृत्त्यन्तरेण ग्राह्या स्यात्तदा बुद्धिबुद्धेर्वृत्तिवृत्तेरति ॥ ६० ॥

प्रसंगोऽनवस्थारूपो योर्थप्रतीतिः पुरुषायुषाप्यसाहकः॥ न हि प्रतीतावप्रतीतो भवति· स्मृतिसंकरश्च प्रसज्य
ते· अयं चैव इति वृत्तिस्थायां चैव तद्ज्ञानाद्यनंतवृत्त्यनुभवात्तज्जन्यस्मृतिकालेपि चैव तत्तज्ज्ञानधारापि
स्मर्येत न त्वेवं स्मर्यते तस्माद्बुद्ध्यंतरैर्बुद्धिग्रहणं स्यादिति स्वीकर्तुमशक्यमित्यर्थः । अनंतवृत्तिकल्पनापेक्षया स
कलवृत्तिगोचरनित्यविभ्विकचैतन्यकल्पने लाघवमिति भावः ॥२१॥ ननु कूटस्थस्य साक्षिणश्चितेन क्रियापूर्व
कसंबंधाभावात्तेन कथं वेद्यं कथं च तद्वेदने सार्वदिकत्वाभावात् आह· चितेरप्रतिसंक्रमायास्तदाकारापत्तौ
स्वबुद्धिसंवेदनं· यथा बुद्धेः क्रियया वस्तुसंबंधः प्रतिसंक्रमोस्ति परिणामित्वान्न तथा चितेः पुरुषस्य बुद्धौ

61

गतिसंक्रमोऽपरिणामित्वात्· किंतुसूर्यस्यजलेप्रतिबिंबनच्छायाध्वकत्वात्पुरुषस्यसत्वांतंतोप्रतिबिंबेसतितद्
तेश्चिदाकारतापत्तौस्वबोग्यायावृत्तेःसंवेदनंभवतिचिच्छायायाग्यात्स्वसंबंधनेसुचिदुपरक्तं चिद्धंद्रनेःतंचि
कद्राचित्कत्वान्ननष्टंस्नंसर्वदेत्यर्थः।।२२।। ननुयदिचित्ताविरिक्तआत्मास्तितर्हि कथंकेषांचिच्चित्तमेवात्मेति
भ्रमइत्याशंक्यचित्तस्यसर्वार्थग्रहणसामर्थ्यंतेषांभ्रमेबीजमित्याह·द्रष्टृदृश्योपरक्तं चित्तंसर्वार्थं·एताव
दीदंसर्वार्थद्रष्टापुरुषश्चेतनोदृश्यंघटाद्यचेतनमितिससर्वोपिचेतनाचेतनप्रपंचोऽर्थोविषयोयस्यास्य
त्तत्सर्वार्थं·तत्रचेतनसान्निध्याच्चिद्रूपतामिवप्राप्तंद्रष्टृचिदुपरक्तंद्रष्टृविषयंभवतिइंद्रियादिद्वाराद्दृश्योप ।।५३।।

क्तं दृश्याकारं सद्द्रष्टृविषयं भवति· तथा च भोग्यत्वा घटाकारं सुखदुःखादिपरिणामलक्षणे भोगात्मकं दृश्य
मपि चित्तं निबिंबात्तत्तादात्म्येन भानाच्चित्तमेवात्मेति युज्यते सौगतानां भ्रमः। जपाकुसुमाद्यर्थाकारग्रहणी
लाभिजातस्फटिकमणिकल्पस्य दृश्याकारपरिहित्वाच्चित्तस्य तदतिरिक्तोऽर्थो ग्राह्यो नास्तीति च विज्ञानवादिनां
भ्रमः। तत्रायं विवेकः। चित्तस्य भोग्यत्वात्तद्भोक्तान्यः स्वीकर्तव्यः स नित्योदिता चिच्छक्तिरित्युच्यते द्विविधा हि
चिच्छक्तिः। नित्योदिता अभिव्यंग्या चेति तत्र नित्योदितायाः कूटस्थचिच्छक्तेः चित्तसत्त्वाभिव्यंग्या चित्सत्तानिबिं
बरूपा सुखादिसारूप्यमापन्ना चिच्छक्तिर्भोग इत्युच्यते· स भोगोऽपि द्विविधः। चिदवसानतारूप एकः परिणाम

लक्षणो परःतः आभिव्यंग्याच्चित्तप्रतिबिंबरूपाच्चिच्छक्तिराद्यः पुरुषस्य भोगः। अपरः सुखादिपरिणामो बुद्धेः
62 माभूच्चैतन्यापाय इति २३॥ क्षणिकविज्ञानमेव चित्तमिति बौद्धमते चित्तातिरिक्त आत्माप्रसाधितद्दर्शनी स्यात्ति
रिक्तः स्थिरश्चित्तास्युपगंतॄणामास्तिकानां मतेपि चित्तादात्मनोतिरिक्तत्वे हेतुं दर्शयति। तदसंख्येयवासनाभिश्चि
त्रमपि परार्थं संहत्यकारित्वात्। यद्यपि द्रष्टृदृश्यदर्शनगोचराद्यखिलवासनाभिश्चित्रितमिव चित्तं तिष्ठत्येतस्मि
नारिक्तपदार्थानभ्युपगमे वासनावशाच्चित्तस्य स्वार्थत्वं संभवति तथापि तत्सर्वार्थं मंतव्यं कुतः संहत्यकारित्वात्।
देहेंद्रियसहकारेण मिलित्वा भोगादिकार्यकारित्वात्। यन्मिलित्वा कार्यकारि तत्परार्थं यथा शय्यासनचंदनादि चैत्र॥ २४॥

स्य॰ नहि ज्ञाप्याद्रिस्वं स्वमात्मानं प्रति किंचित्प्रकाशोति किं तु चैतन्यस्यैव अत एव देहेन्द्रियादीनामिव चित्तस्यापि पुरुष
शेषमूलकस्तत्कारणभूतसत्त्वादिगुणव्यवहारः। एवं च संहत्यकारित्वलक्षणाद्धेतोश्चित्तस्य परार्थत्वे सिद्धे चित्ताति
रिक्तत्वमात्मनो यो सिद्धं व्याख्यातं चेतत्साधनपादे तदर्थ एव दृश्यस्यात्मेति सूत्रेण २४। चित्ततदर्थयोश्चित्तपुरुषयो
र्भेदः परीक्षितः इदानीं शास्त्रफलं कैवल्यं निर्णेतुं द्वाभिः सूत्रैः पत्र मते॰ विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ मातृमा
नमेयात्मकस्याखिलप्रपंचस्य तत्स्वभावः पिंडवेदको भावमापन्नस्यापि यथोक्तप्रकारैरन्योन्यं ॥ विशेषकदर्शी नो विवेक
दर्शिनश्चित्तस्य या पूर्वस्थिता आत्मभावना स्वसत्ताजिज्ञासा किंस्वरूपोऽहमासं किंस्वरूपो वा निष्ठामि किंस्वरूपो

वाभविष्यामीत्याद्याकारानस्याः शोकाद्यसंतानर्यहेतोर्निवृत्तिर्भवतीत्यर्थः। तथा च श्रुतिः। एतं ह वाव न तपति किम
हं साधु नाकरवं किमहं पापमकरवमित्यादि॥२५॥ ततः किमत आह। तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं। तदा वि
शेषदर्शनावस्थायां आत्मभावनानिवृत्तौ विक्षेपशून्यं चित्तं कैवल्यस्य प्राग्भारः प्रारंभो यत्र तादृशं सद्विवेकनि
म्नं विवेकमार्गप्रवणं तन्मात्रनिष्ठं भवतीत्यर्थः॥२६॥ ननु विवेकदर्शिनोऽप्यहं ममेति स्वस्थानं प्रत्ययाः दृश्यंते कुतस्ते
भवंतीत्यत आह। तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः। कोमलकंटकन्यायेन विशेषदर्शने जातेऽपि प्रसंख्यानच्छि
द्रेषु भिद्यमानेभ्यः प्रत्ययांतराणि मिथ्याज्ञानरूपाणि भवंतीत्यर्थः। कारणोच्छित्तिद्वारेणैतेषां हानं कर्तव्यमित्युक्तं भ॥२७॥

वृत्ति·२७ कस्तेषां हानोपाय इत्यत आह· हानमेषां क्लेशवदुक्तं· अविद्यादयः क्लेशाः क्रियायोगतनूकृतास्तदवस
रे लब्धप्रसराः प्रसंख्यानदहनदग्धाः पुनश्चित्ते संस्कारं न प्रसुवते एवं व्युत्थानसंस्कारा अपि विवेकख्यातिपरिपा
कदशायां प्रत्ययान्तराणि कुर्वाणाः परिपक्वप्रसंख्यानदहनदग्धाः संस्कारबीजभावात् प्रसवधर्माणो भवन्तीति क्लेशवदे
तेषां हानमुक्तं वेदितव्यं·२८ एवं प्रत्ययान्तरानुदयेन स्थिरीकृते समाधौ यादृशस्य योगिनः समाधेः प्रकर्षप्राप्तिर्भ
वति तादृशमुपायमाह· प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः। प्रसंख्याने यावत्तत्त्वा
नां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वस्वरूपस्य विभावनं विवेकसाक्षात्कारस्तत्रापि योऽकुसीदो वा

64

द्दुषि विकवत्सर्वभावाधिष्ठातृत्वरूपां सिद्धं न प्रार्थये [redacted] यतेतस्य योगविघ्नाभावेन सर्वप्रकारं विवेकख्यातेः परिपोषा
द्धर्ममेघनाम्नी संप्रज्ञातस्य या परा काष्ठा स समाधिर्भवतीत्यर्थः प्रकृष्टमशुक्लकृष्णं धर्मं परमपुरुषार्थलक्षणं मे
हतीति सिंचतीति धर्ममेघः ॥२९॥ ततः किमत आह ततः क्लेशकर्मनिवृत्तिः ॥ ततो धर्ममेघसमाधेर्दशादस्य द्वारा क्लेश
कर्मणोः क्षपितो सघेते इत्यर्थः ॥ क्लेशा अविद्यादयः पंच कर्म शुक्लादिभेदात् त्रिविधं तज्जन्यमदृष्टं च ॥३०॥ निवृत्ते
षु तेषु किं भवतीत्यत आह तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पं तदा क्लेशकर्मनिवृत्तौ सर्वे स्यावर
णमले स रजस्तमोरूपे सापेतस्य ज्ञानस्य सत्त्वप्रकाशस्यानंत्यादिभुत्वा ज्ञापकत्वाज्ज्ञेयं तत्स्वकाश्यमल्पं भव ॥६४॥

वृत्तिः यदिहि पंचविंशतितत्त्वातिरिक्तं वस्तु तिष्ठेत्तदा तदपि सकार्यं येन ज्ञेयस्यैव स्वल्पत्व यान्यत्र सकाशात्तेन सकलस्या
ल्पतये सर्थः॥३१॥ ततः किमित्यत आह। ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां॥ ततो ज्ञानानंसासरवैराग्ये
णकृतेति व्याख्यातो भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गुणाः सत्त्वरजस्तमोरूपास्तेषां परिणामः आपु
रुषार्थसमाप्तेरानुलोम्येन प्रातिलोम्येन वा अंगांगिभावावस्थितिलक्षणस्तस्य योसौ क्रमो वक्ष्यमाणस्तस्य स
माप्तिर्निष्ठा न पुनरुद्भव इत्यर्थः॥३२॥ क्रमस्यात्र लक्षणस्य लक्षणमाह। क्षणप्रतियोगी परिणामापरान्तनिर्ग्रा
स्वः क्रमः॥ क्षणोऽल्पीयान्कालस्तस्य प्रतियोगी विरोधी एकेनापि क्षणेनानंतरितः अविरलधारेति यावत्स क्र

मद्दष्टमंतव्यः।तत्रप्रमाणमाह॥परिणामापरांतनिर्ग्राह्यःइतिसुत्र।स्थितेनवीनेवस्त्रेपुराणतादर्शनेननवीनत्वनत्वमा
रभ्यसूक्ष्मक्षणेषुपुराणतायाःसूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलस्थूलतरस्थूलतमत्वेनजायमानायाभेदःक्रमहेतोः
65 परांतेननवीनत्वादपरस्यपुराणत्वस्यांतेनस्थूलतमचरमपुराणत्वेनग्राह्योनुमेयः।पूर्वपूर्वपुराणतामंतरेणच
रमपुराणतायाअसंभवादित्यर्थः॥३३॥इदानींशास्त्रप्रतिपाद्ययोगफलस्यकैवल्यस्यस्वरूपमाह॥पुरुषार्थशू
न्यानांगुणानांप्रतिप्रसवःकैवल्यंस्वरूपप्रतिष्ठावाचितिशक्तेरितिकृतभोगापवर्गाणांकृतकृतानतयासुध्या
दिगुणानांपुरुषोपकरणलिंगशरीरात्मकानांयःप्रतिप्रसवःस्वकारणेःसंतविलयस्तस्मकुतेःकैवल्यंयत्तुधर्म्यमि॥६५॥

66

दृचितिशक्तिः स्वरूपेण स्वरूपप्रतिष्ठा बुद्धिसत्वोपाधिकरूपापरामर्षात्तत्पापाये स्फटिकस्वरूपप्रतिष्ठावस्था
पुरुषस्यैकैवल्यं·चाशास्त्रार्थे·परस्परवियोगप्रकृतिपुरुषयोरपिकैवल्यैनेकाविताभवतिइतिशास्त्रः शास्त्रपरिस
माप्तौ·३४। नमामि परमानंदं विश्वेशं येन मे हृदि·प्रवर्तितेयं कल्याणी वाणी सूत्रानुसारिणी·१। संतासंतापहारि
ण्यः संतु पातंजलोन्नयः। कलानिधेरिव कलाः सकलानंदहेतवः।२। पतंजलिः सूत्रकारो यस्मिन्व्यासश्च भाष्यकृ
त्·वृत्तिकारो महाराजः को न्व्यायांस्तत्र मे श्रमः·३। तथापि स्वांतसशुद्ध्यै सुलभत्वस्य चापलात्। वृत्तावनेकारदृष्टा
स्मिप्रवृत्तो माह संतु तत्·४। इति महायाज्ञिकगंगाधरपाठककुलोसन्तसनतनाग्निहोत्रयाज्ञिकशिवशंकरसूनुनोदयकरेण ॥६५॥
कृते योगवृत्तिसंग्रहे कैवल्यपादः चतुर्थः समाप्तः समाप्तश्चायं ग्रंथः ॥ संवत १९०० शाके १७६५ चैत्रवा ५। भृगुवार ॥ध॥

[illegible]

पाठकोपनामकरामचन्द्रस्य
नौवै धनाधशर्मणोऽदः पुस्तकम्

१७००